बफरमायस लालानथुमलसेठ

पस्तकतिथनिर्णका मुद्दवारकेछपा

मतवअ खनवरी खिपटखाजारों

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

...णायनमः ॥ अथ तिथिनिर्णयदर्पणः लिख्यते ॥ स्वेष्टं श्रीमदनाघातसीताराम्पदद्वयं शिवा
भिमलाकांतौ वेदेगीर्वाणवंदिते २ दृष्ट्वाऽनंतादिमदनोदयमाधवीयहेमाद्रिगौडनयनिर्णयसिंधुमुख्या
न् लक्ष्मीपतिर्द्विजसुतः कमठादिवासी ग्रंथान्नतोऽति तिथिनिर्णयदर्पणाख्यं ३ तत्र पूर्वं प्रतिपन्निर्णयः लि
ख्यते शुक्ला प्रतिपद्यपरा ऽपराह्णव्यापिनी तदा पूर्वा ग्राह्या युग्मवाक्यात् ॥ स्कांदेपि ॥ प्रतिपत्सन्मुखी
कार्या या भवेदपराह्णिकीति तदभावे तु माधवः तदभावे तु सायाह्नव्यापिनी परिगृह्यतामिति कृष्ण प्र
तिपत्परविद्धा ग्राह्या द्वितीयानुरोधात् ऽविलोमेति दीपिकोक्तेः अत्र तिथीनां निर्णये अह्नः पंचधाभागोक्तेः यथः
प्रातः संगवमध्याह्नमपराह्णसायाह्नपंचसौ इति अत्र सामान्यतः वेधास्तु विद्धावेधस्तयोस्त्रिमुहूर्तोक्तेः तदा
तदाह पैठीनसी पक्षद्वयेपि तिथयः तिथिं पूर्वां तथोत्तरां त्रिमुहूर्तं विविध्यंति सामान्योयं विधिः स्मृतः इति
वेध्यायेत्रिमुहूर्तापदभवति तदा विद्धा ग्राह्या तदुक्तं माधवेन वेधोपि त्रिमुहूर्तो वनन्यूनो वेधमर्हतीति
युग्मवाक्यं तु युग्माग्नियुगभूतानां वसुमुन्योर्वसुरंध्रयोः रुद्रेण द्वादशी युक्ता चतुर्दश्याच पूर्णिमा प्रतिपद्यथवा
मावास्या तिथ्योर्युग्मं महाफलं मेतद्व्यस्तं महादोषं हंति पुण्यं पुराकृतमिति द्वितीया तु तिथ्या युतान्तिथ्यापि द्वि
तीया युते वेडूमेण ज्ञेयं त्रयोदशी तु कर्तव्या द्वादशी सहिता मुने इति सुमंतोक्तेः यच्चाथर्वणः प्रतिपत्सद्वितीय
स्याद्वितीया प्रतिपद्युता चतुर्थी संयुता याच सा तृतीया फलप्रदा पंचमी च प्रकर्तव्या षष्ठ्या युक्ता तु नारदे इति तत्कृष्ण

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ति चैत्रमलादिर्मलमासः पूर्ववर्षेऽन्तर भवतीति ब्रह्मपुराणोक्तेः अत्र तैलाभ्यंगो नित्यः अत्रैव नवरात्रारंभः शा
रत्काले महापूजा क्रियते या च वार्षिकीति मार्कंडेयपुराणोक्तेः तत्र परविद्धैव ग्राह्या तदुक्तं देवीपुराणे
४ अमायुक्ता न कर्तव्या प्रतिपच्चंडिकार्चने मुहूर्तमात्रा कर्तव्या द्वितीया द्विगुणान्वितेति पारणनिर्णयस्तु
शारदीयनवरात्रे नवमीनिर्णये वक्ष्यामः चैत्रमलमासे सति अतिमशुद्धपक्षे देवीपूजारंभः कार्यः
मलेऽनिषेधात् दुर्गायास्थापनोत्थानं ध्वजोत्थानं च वर्जिताः पूर्वत्र प्रतिषिद्धानीति कालदर्शात् अत्र
प्रपादानमुक्तं नारके भविष्ये प्रपादानाशक्तौ धनघटो देयः इति अथ आश्विनशुक्लप्रतिपदा नवरात्रा
रम्भा तदुक्तम् आश्विने मासि शुक्ले तु कर्तव्यं नवरात्रकम् प्रतिपदादिक्रमेणैव यावच्च नवमी भवेदिति
अत्रोदयव्यापिनी ग्राह्या तदुक्तं देवीपुराणे शरत्काले महापूजा क्रियते या च वार्षिकी सा कार्योदय
मिन्यां न तत्र तिथियुग्मेति दिनद्वये तद्व्याप्तावव्याप्तौ पूर्वा अमाविद्धनिषेधात् दर्शभागो भवेत्तत्र उ
सिद्धं च प्रजापते तंदापादौ युक्ता या यत्र स्यात्पूजनं ममेति देवीपुराणात् अन्यदपि येयामा पूजयेल्लिंग
द्वितीयादिगुणान्वितां शौ पच्छारदीं ज्ञात्वा सोऽश्नुते सुखमव्ययमिति तत्र विशेषोक्तः यदा तु प्रतिपन्ना
ती शाघशात्पूर्वकालविद्धे वो लति तदासैव कर्तव्या दुर्गास्थापनकर्मे लोपनात् तदाह लल्लः तिथि
शरीरं तिथिरेवकारणं तिथिःप्रमाणं तिथिरेवसाधनं इति एतद्विषया एवैवामायुक्ता कर्तव्येत्यादिव ४

CC-0 Courtesy Shri K S Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि. इति केचित् अन्ये तु निशीथार्द्धकमेव शवलाब्धकुले पीतिं वदंति अथ सामान्यप्रतिपत्प्रसंगाद्विशेषप्रतिप
२ दुच्यते चैत्रशुक्लः प्रतिपत्प्रभिसंतोत्सवः सार्वोदयिकी ग्राह्या प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवाविति भ
विष्योक्तेः प्रतिपत्पंचमी भूतसावित्री वट पूर्णिमा नवमी दशमी चैव नोपोष्या परसंयुतेति ब्रह्मवैवर्तीति व
चनात् दिनद्वये तु आग्नेयी तथा च वृद्धवशिष्ठः वत्सरादौ वसंतादौ वलिराज्ये तथैव च पूर्वविद्धैव कर्तव्या ।
प्रतिपत्सर्वदा बुधैरिति अत्रैव होलिका धूलिवंदनमुक्तं भविष्ये अत्रैवाम्र कुसुमप्राशनं सचंदनं कार्यमित
दुक्तं पुराणसमुच्चये लेतुषारसमये शित पंचदश्यां प्रातर्वसंतसमये समुपस्थिते च संप्राप्य चूर्णकुसुमं
सह चंदनेन सर्वार्थसत्य पुरुषोपसमासुखीस्यात् अथ चैत्रशुक्ल प्रतिपदात् वत्सरारंभः अत्र संवत्स
र प्रतिपदामारभ्यापि ऽन्त्येच कस्मादिवृत्ते शुक्लादिर्भवच विवाहादौ च सौरादि मासं कृत्ये विनिर्दिशेत् तु
क्ते अत्र प्रतिपदोदयेको ग्राह्या तदुक्तं ब्राह्मे चैत्रमासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि शुक्लपक्षे समग्रं तु तदा स
र्योदये सति इति दिनद्वये तु आग्नेनाग्ना वव्याग्नी पूर्वैव तदुक्तं ज्योतिर्निबंधे चैत्रसितप्रतिपद्यो वाराऽर्को
दये स वर्षेशः उदयद्वितये पूर्वो नोदये युगलेपि पूर्वस्यायस्माच्चैत्र सितादेरुदयाद्भानोः प्रवृत्तिरब्दादेरिति अथ चैत्रे
मलमासे सति तत्रैव वत्सरारंभविधानं कर्तव्यं शुक्लास्तदिवदिति गास्तप्रयुक्तकार्येषु मूढत्वं गुरुशुक्रयोः न
दोषकृन्मलो मासो गुर्वादित्यादिकं तथा इति मुहूर्तचिंतामणि पीयूषधारायां शुभाशुभप्रकरणे चोक्तं नाहि ।

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

अत्र प्रतिपद आद्यषोडशनाड्यस्तु उक्ता पूजनं स्थापनं कार्यं अत एवापराह्णे स्थापनमुक्तं यद
नि:दिने प्रतिपद्षोडशनाडीगते द्वितीय दिने प्रातरेव स्थापनं एतद्विषयान्येव प्रातः पूजनम् विष
शीवचनानि किंच आद्यास्तु नाडिकास्त्यक्त्वा षोडश द्वादशापि वा अपराह्णे च कर्तव्यं शुद्धसंतति
कांक्षिभिः इति प्रातस्तु पूजनं देव्याः प्रातरेव विसर्जनं इति इत्यादिनि व्यवस्थान्तेपानि अत्र चित्रा वैधृति
त्यागः कैश्चिदुक्तः प्रतिपद्याश्विने मासि भवेद्वैधृतिचित्रया आद्यपादौ परित्यज्य प्रारभेन्नवरात्रिकं इ
ति कात्यायन वचनं किंच यदारम्भतद्दिने एव चित्रा वैधृत्योः षष्टिदंडात्मकत्वयोगे उभयपादयोः सायंप
र्य्यंतं समाप्तौ सायंकालस्थापन प्रसंगात्स्यान्त्वन्निषेधात् कथमित्यभिधार्य्य रुद्रयामले शिवोक्तेः संपूर्णा
प्रतिपद्येव चित्रा युक्ता यदा भवेत् वैधृत्यावापि युक्ता स्यात्तदा मध्ये दिने रवौ अभिजित्तु मुहूर्ते तु तत्र स्थापन
मिष्यते इत्यादीनि वचनानि अस्तु प्रतिपदि पर्य्याप्ति द्वितीयाविद्धायां तु नक्षयोगादिदोषः तदुक्तं दुर्गो
त्सवे भद्रान्विता चेत्प्रतिपत्तु लभ्यते विरुद्धयोगैरपि संगता सतीसैवापराह्णे विबुधैर्विधेया स्त्रीपुत्रराज्या
दिविरोद्धहेतुः इति नेमचंद्रादिलग्नाभ्युद्वापिनदोषः अत्र रात्रौ कलशस्थापनं न कार्यं न रात्रौ स्थापनं का
र्यं न च कुंभाभिषेचनम् इति मत्स्योक्तेः इदं च अस्तकरस्तादपि कर्तव्यम् न च अस्ते तपाजीवे सिंहस्थे च बृहस्प
तौ कुर्य्याच्चैव स्वदेवार्चा प्रत्यब्दं कुलधर्मतः इति धर्मप्रदीपात् ॥ + ॥ + ॥ + ॥ + ॥ + ॥ ५

CC-0 Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰ मलेनूत्तरभुक्तपदे कर्त्तव्यं कर्त्तव्या चोत्तरे क्रियेति वचनात् इदं सूतकादिप्राप्तावपि कर्त्तव्यं न दोषः अक्रोत यजीवे
६ सिंहस्थे च वृहस्पतौ कुर्य्याच्चैव स्वदेवार्चां प्रत्यब्दं कुलधर्मतः इति धर्मप्रदीपात् मूले नूत्तरभुक्तपदे क कर्त्त
व्या चोत्तरे क्रियेति वचनात् इदं सूतकादिप्राप्तावपि कर्त्तव्यं सूतके पूजनं प्रोक्तं दानं चैव विशेषतः देवी अ
दिश्य कर्त्तव्यं तत्र दोषो न विद्यते आरब्धे तु पित्रसूतकं विना स्वयमेव कार्य्यं अनारब्धे द्विजद्वारा कारयेदिति
सिद्धांतः अथ कार्त्तिक शुक्ल प्रतिपादि गोक्रीडन मुक्तं तच्च चंद्रदर्शन युक्त प्रतिपादनकार्य्यं तत्र नि अ
धात् तदुक्तं पुराणसमुच्चये ॥ गवां क्रीडादिने यत्र रात्रौ दृश्येत चंद्रमा सोमो राजा पशून् हंति सुरभी पूजकांस्त
पेति पूर्वान्हे क्रीडनं गवामिति वचनं प्रतिपद्दर्शसंयोगे क्रीडने तु गवां मतं परविद्धे अपः कुर्य्यात् पुत्रदारधन
क्षयः इति देवलवचनात् चंद्रदर्शनाभावे द्वे पूर्वा प्रतिपद्विवाऽन्येयं प्रतिपदो दिनद्वये सायंव्यापित्वे मार्गपाली
परादिनद्वये अप्राप्तौ पूर्वैवेति वलिपूजनमपि पूर्वविद्धायामेव श्रावणी दौर्गा नवमी दूर्वा चैव हुताशनी पूर्व
विद्धैव कर्त्तव्या शिवरात्रिर्वलेर्दिनमिति हेमाद्रौ पाद्मोक्तेः अन्नकूटो वर्द्धनपूजा तत्र प्रातःकालव्यापिनी ग्रा
ह्या प्रातर्गोवर्द्धनः पूज्य इति वचनात् अत्र नारी नीराजनं मंगलमालिका च परविद्धायामेव ॥ तदुक्तं भवि
ष्ये लभ्यते यदि वा प्रातः प्रतिपत् घटिकाद्वयं तस्यां नीराजनं कार्य्यं सायं मंगलमालिकेति अथ मार्ग
शीर्षः कृष्ण प्रतिपद् रोहिणीयोगे महत्फलमुक्तं रोहिणी प्रतिपद्युक्ता मार्गे मासि सितेतरा गंगायां ६

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि. यदि लभ्येत सूर्यपर्वशतैः समेनि भविष्यात् इति निर्णयदर्पणे प्रतिपत्प्रकरणम् अथ द्वितीया अत्र कु
७ ह्वायदा पूर्वदिने प्रातःकालगा चेत् पूर्वा अन्यथा परविद्धा शुक्लातु परविद्धैव तथा च दीपिकायाम् कुह्वा
द्वितीया यदि सा पूर्वान्हे यदि सा सिता तु परतः सर्वाणि साधारणानिर्णयः अथ प्रसंगाद्विशेषद्वितीया उच्यते
आषाढशुक्लद्वितीयायां रथोत्सवः सा पुष्यसंयुता ग्राह्या नक्षत्राभावे तिथिरेव ग्राह्येति सिद्धान्तः कृष्णपू
र्वा शुक्लापरा इति वचनात् परविद्धा ग्राह्या इति अथ श्रावणादिमासचतुष्टयं कृष्णपक्षद्वितीयासु अशून्य
शयनव्रतमुक्तं तत्र चंद्रोदयव्यापिनी ग्राह्या दिनद्वये तत्र सत्त्वे सत्त्वे परेति सिद्धान्तः कार्तिकशुक्लद्वितीया
यमद्वितीया सापरान्हव्यापिनी ग्राह्या तत्रैव पूजा कर्मकालत्वात् ऊर्जे शुक्लद्वितीयायाम् अपरान्हेऽर्चयेत् यमं
स्नानं कृत्वा भानुजायां यमलोकं न पश्यतीति स्कांदोक्तेः दिनद्वये परान्हव्याप्तौ परैव युग्माग्नीति युग्मवाक्यम्
अत्र भगिनीहस्ते भोजनमुक्तं कार्तिके शुक्लपक्षे तु द्वितीयायां युधिष्ठिर यमो यमुनाया पूर्वं भोजितः स्वगृहेऽर्चितः
अतस्यां निजगृहे पार्थ न भोक्तव्यम् अतो नरैः यत्नेन भगिनीहस्ताद्भोक्तव्यम् युधिष्ठिर वर्द्धनं भ्रातृभिर्भगिनीपूजा
कर्तव्या तु धनादिभिः सर्वा भगिन्यः संपूज्या अभावे प्रतिपुत्रिका इति हेमाद्रौ स्कांदात् निर्णयदर्पणे द्वितीया
प्रकरणं २ अथ तृतीया प्रकरणं सा रंभाव्रतातिरिक्ता सर्वा अपि परैव युग्मवाक्यं रंभाव्रत विषये तदुक्तं ब्रह्मवै
वर्ते रंभाव्रतं वर्जयित्वा एकां तृतीयां मुनिसत्तम अन्येषु सर्वकार्येषु गणा ४ प्रोक्ता प्रशस्यते तदाहमाध ७

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰ वः मुहूर्तमात्रत्वेपि दिने गौरीव्रतं परे मुहूर्ताधिकायां मध्येवं गण। ४ योगं प्रशस्यते इति गौरीव्रतनिर्णयः स्वल्पो
८ पि वेधो ग्राह्यः। न मुहूर्तो न च परिमितः तदाह कलाकाष्ठापि वा चैव द्वितीया या प्रदृश्यते सा तृतीया न कर्तव्या
गणसंयुतेति स्कांदात् द्वितीयायां च संयुक्तां या करोति विमोहिता सा वैधव्यमवाप्नोति प्रवदंति मनीषिणः
इति ब्रह्मवैवर्तेपि कलाकाष्ठामुहूर्तस्वरूपमाह मार्कंडेयः अक्षिपक्ष्मपरिक्षेपो निमिषः परिकीर्तितः द्वौ निमेषौ त्रु
टिर्नाम द्वौ निमेषौ त्रुटिर्नाम द्वौ २ त्रुटी लवस्स्मृतः द्वौ २ लवौ क्षण इत्युक्तः काष्ठा पंचदश क्षणाः त्रिंश
त्काष्ठा कला प्रोक्ता कलास्त्रिंशन्मुहूर्तकः तेन त्रिंशदहोरात्रमित्याह भगवान् हरः इति सामान्यनिर्णयः
अथ विशेषतः प्रसंगादन्यास्तृतीया उच्यंते तत्र चैत्रशुक्लतृतीयायां सौभाग्यशयनाख्यं गौरीव्रतमुक्तं तत्र
परा विद्धा ग्राह्या मुहूर्तमात्रसत्वेपि दिने गौरीव्रतं परे मुहूर्ताधिकायां मध्येवं गणयोगं प्रशंसन्नादिति माधवः अ
त्र द्वितीयावेधः कलाकाष्ठादिरूपोपि त्रिमुहूर्ते ६ घटकोपेयः तदुक्तं कलाकाष्ठा यदा चैव द्वितीया संप्रदृश्य
ते सा तृतीया न कर्तव्या कर्तव्या गणसंयुते ति स्कांदात् यदा तु तृतीयालोपवशात्पूर्वविद्धैव मिलति
तदाप्रधानलोपस्यान्याय्यत्वात् पूर्वविद्धैव ग्राह्या तदुक्तम् पूर्णिमास्तमिता या तु तृतीयांच षष्ठी चैव त्रयोदशी
पूर्वविद्धापि कर्तव्या यदि न स्यात्परे हनि इति वृद्धवशिष्ठवचनात् इदमेव मत्स्यजयंती अस्यामेवारुंधती
व्रतमुक्तं स्कांदे तत्रापि परैव द्वयमेव मन्वादिः अत्र पिंडरहितं श्राद्धं नित्यमुक्तं कालादर्शे अथ वैशाख शु ८

नि॰ क्तृतीया अक्षय्यतृतीयेति सा पूर्वाह्णव्यापिनी ग्राह्या दिनद्वये तथात्वे परविद्धा अत्र पुण्यविशेषमुक्तम्॥ इयं कृ
६ त्तिकायोगादप्यथवा रोहिणीयोगाच्चतुर्थ्यायोगाद्बुधसोमवारयोगाद्यामहापुण्यतमा वैशाखशुक्लपक्षेतु तृती
यायां रोहिणी युता दुर्लभा बुधवारेण सोमेनापि विशेषतः गौरीविनायकोपेता रोहिणी बुधसंयुता विनापि रोहि
णीयोगात्पुण्यकोटिफलप्रदेति यस्यां यद्दीयते दानं स्वल्पं वा यदि वा बहु तत्सर्वमक्षयं यस्मात् ख्याते य
मक्षयेति भविष्यात् अस्यां सुवर्णघटदानं च कार्यं इयमेव युगादिः युगादिमन्वादि हेमाद्रिसारे स्फुटं ग्रा
ह्येपि पूर्वाह्णव्यापिनी ग्राह्याः पूर्वाह्णेषु सदा कार्याः शुक्ला मनुयुगादयः दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णि
काः इति पद्मोक्तेः ६ ६ शुक्ले तथा कृष्णे युगादिकवयो विदुः शुक्ले पूर्वाह्णिके ग्राह्या कृष्णे चैवापराह्णिके इति
नारदोक्तेः वैशाखस्य तृतीयां यः पूर्वविद्धां करोति वै हव्यं देवा न गृह्णन्ति कव्यं च पितरस्तथेति गोभिलोक्तेः इयमेव
युगादिः अत्रापि पिंडरहितं श्राद्धं कार्यं इयमेव तृतीया परशुरामजयंती तत्र प्रदोषव्यापिनी ग्राह्या दिनद्वये
तद्व्याप्तावंशतः समव्याप्तौ परान्यथा पूर्वेति सिद्धान्तः तदुक्तं भविष्ये शुक्ला तृतीया वैशाखे २ शुद्धा पौष्या २ दिन
द्वये निर्णयं पूर्वयामे चेदुत्तरान्यत्र पूर्विकेति भार्गवार्चनचंद्रिकायामपि वैशाखस्य सिते पक्षे तृतीयायां पुनर्वसौ
निशायाः प्रथमे यामे रामाख्यः समभूद्धरिः रेणुकायास्तु यो गर्भादवतीर्णो विभुः स्वयमिति अथ ज्येष्ठशुक्लतृती
यायां रंभाव्रतं तत्र पूर्वविद्धा ग्राह्या तदुक्तं माधवीये बृहत्तपा तथा रंभा सावित्री वटपैतृकी कृष्णाष्टमी च भूता ६

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰ चकर्तव्या सन्मुखी तिथिरिति स्कांदात् ॥ आषाढकृष्णतृतीया आत्रेयकल्पादि परा ॥ श्रावणकृष्णतृती
१० या कज्जली संज्ञेति कृष्ण सापरा दिवोदासीये अत्र श्रवणर्क्षयोगे विष्णुना विशेषतः कार्य्यं बहुधनधान्यादि
वर्द्धये इति हेमाद्रौ अथ श्रावणशुक्लतृतीया मधुश्रवाख्या गुर्जरेषु प्रसिद्धा सापि परा ग्राह्येति दिवोदासि
ये सा द्वितीयायोगेन कुर्यात् अत्र द्वितीयायोगे प्रत्यवायमप्याह द्वितीयाशेषसंयुक्ता या करोति विमोहि
ता सा वैधव्यमवाप्नोति प्रवदंति मनीषिणः चतुर्थीयुक्तायां तु फलाधिक्यमाह चतुर्थीसहिता या तु सा तृ
तीया फलप्रदा अवैधव्यकरी स्त्रीणां पुत्रपौत्रविवर्द्धिनी इति माधवीये आपस्तंबे अस्यामेव स्वर्णगौरीव्रतं स्कं
दपुराणे अत्रापि परैव यदा तु तृतीया लोपवशात् पूर्वविद्धैव मिलति तदा प्रधानलोपस्यान्याय्यत्वात् पूर्वविद्धाग्रा
ह्या तदुक्तं पूर्णिमा च तृतीया च षष्ठी चैव त्रयोदशी पूर्वविद्धापि कर्त्तव्या यदि न स्यात्परेऽहनि इति बहुवाशिष्ठवच
नात् इति सौभाग्यवत्या पूजनं कार्य्यं ब्राह्मणद्वारा कार्य्यं व्रतमपि सुखी कुर्य्यात् अथ भाद्रपदशुक्लतृतीया
यां हरतालिकाव्रतम् इयं परा रंभावर्जिते तृतीयायां नो पूर्वविद्धात्वमिति पूर्वोक्तमेव यदा तृतीयालोपः स्यात्तदा
पूर्ववत् कज्जलसंज्ञवत्कर्त्तव्या सर्वत्र हस्तर्क्षसोमवारयोगे अतिधन्या तदुक्तं भाद्रे मासि सिते पक्षे तृतीया हस्त
सोमयुक् तदनुष्ठानमात्रेण सर्वपापैः प्रमुच्यते इति व्रतार्के भविष्योत्तरात् अस्यामेव हस्तगौरीव्रतं अत्रैव को
टीश्वरव्रतम् ॥ व्रतार्के स्कांदात् अत्रैव हस्तर्क्षे सामवेदिनामुपाकर्म तदुक्तं श्रवणर्क्षे तु ऋग्वेदे यजुर्वेदे च १०

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि. पूर्णिमा हस्तछंदोगश्रावण्यां तृतीयायां नभस्यस्य अत्रापुनः परविद्धैव तदुक्तं दीपिकायां सामविदां हस्ते विद्ध्या
११ त् किं यांतद्वधे परविद्धएवविहितमिति तत्र संक्रांतिश्चेत्तन्न कार्यं तदुक्तं संक्रांतिग्रहणाद्यपि यद्युपाकरणं भवे
त् तन्मासे हस्तयुक्तायां पंचम्यां वातदिष्यते इति तत्रापि विशेषः प्रयोगपारिजाते अर्द्धरात्रादधस्ताच्चेत्संक्रांति
ग्रहणं यदा उपाकर्म न कुर्वीत परतश्चेन्न दोषकृदिति सिद्धांतः सामगानामधिमासेपि भवति तेषां सिंहस्थसूर्ये
विधानात् एतच्च सामगैरपराह्ने कार्यं भल्लपदेतु हस्तेन उपाकर्मापराह्निकमिति अथाश्विनकृष्णतृतीयायां व
हद्गौरीव्रतं कर्णाटे प्रसिद्धम् ॥ इयं चंद्रोदयव्यापिनी ग्राह्या तदुक्तं भविष्ये शृणुत्वं वहती गौर्य्योः व्रतं संतानदायकं
भाद्रकृष्णतृतीयायां निशिचंद्रोदये शुभे इति व्रतार्के दिनद्वये तद्व्याप्तिवशतः समव्याप्तौ परान्यथा पूर्वैव अत्र भाद्रेद
र्शांतो मासोज्ञेयः अस्यामेव विशालाक्षीव्रतं पत्रोक्तं अत्र रात्रिव्यापिनी ग्राह्या अथाश्विनकृष्णतृतीयायां ललि
तादेव्या यात्रोक्ता काशीखंडे अत्राश्विनोऽमांतमासेन ग्राह्यः इयमपि परैव अथ मार्गशीर्षे माघमासे वा सौभाग्य
सुंदरीतृतीयाव्रतमुक्तम् व्रतार्के भविष्योत्तरात् अयमपि विशेषतः परविद्धा पूर्वविद्धा यानिषेधात् द्वितीयाविद्धा
यां तु मार्गशीर्षे क्वचिद्रंभाव्रतमुक्तम् तदुक्तं भविष्योत्तरे रंभातृतीयायां वक्ष्यामीत्यु पक्षस्य मार्गशीर्षे शुभे मासि
तृतीयायां नराधिप सौभाग्यार्थं पुराचीर्णं रंभाया राजसत्तम तेन रंभातृतीयेयं परं सौभाग्यदायनीति इयं पूर्वा
बृहत्तपा तथा सावित्री वटपैतृकी कृष्णाष्टमी च भूता च कर्तव्या सन्मुखी तिथिरिति स्कांदात् इति निर्णयः । ११

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि· दश्येशो तृतीया प्रकारो ३ अथ चतुर्थी सा गणेशव्रतव्यतिरिक्ता परविद्धैव ग्राह्या वा यत्तु माधवीयेपि एकाद
१२ शी तथा षष्ठी अमावस्या चतुर्थिका उपोष्या परसंयुक्ता परा पूर्वेण संयुतेति बृहद्वसिष्ठोक्तेः नागचतुर्थी
ति मध्याह्नव्यापिनी पंचमीयुता ग्राह्या दिनद्वये तद्व्याप्त्यव्याप्तौ परैव गणेशचतुर्थीति गणेशस्य दिवस
त्रे मध्याह्नव्यापिनी पूर्वविद्धा ग्राह्या तदुक्तम् चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते मध्याह्नव्यापि
नी चेत्स्यात्परतश्चेन्न्यरेहनि इति बृहस्पतिवचनात् द्वयेदिने तद्व्याप्त्यव्याप्तौ वृषंतः साम्यव्याप्तौ पूर्वैव मा
तृवेधप्राशस्त्यात् संकष्टचतुर्थ्यां तु चंद्रोदयस्यावश्यकत्वं न मध्याह्नस्य तत्रापि दिनद्वये चंद्रोदये सत्वे
पूर्वदिनद्वये चंद्रोदयव्याप्तौ परैवेति दिक् इति सामान्यनिर्णयः अथ प्रसंगात् विशेषात् चतुर्थी उच्यते अ
थ ज्येष्ठशुक्लचतुर्थ्यां उमापूजनं ॥ ज्येष्ठशुक्लचतुर्थ्यां तु जाता पूर्वं उमा सती तस्मात् सा तत्र संपूज्या
स्त्रीभिः सौभाग्यवृद्धये सा पूर्वयुता ग्राह्या तदुक्तं गोविंदार्णवे पुराणसमुच्चये गौर्यां चतुर्थी वटधेनुपूजा दुर्गा
र्चनं दुर्भरहोलिके च वत्सस्य पूजाधिवरात्रिरेता परान्विता घ्नंति नृपं मरावमीति आषाढशुक्लचतुर्थी एष्यंत
रकल्पादि श्रावणकृष्णचतुर्थी संकष्टचतुर्थी सा उच्यते सा चंद्रोदयव्यापिनी ग्राह्या तदुक्तं स्कांदे श्रावणे ब
हुले पक्षे चतुर्थ्यां च विधूदये तस्मिन्दिने व्रतं कार्यं संकष्टाख्यं सुरेश्वरीति दिनद्वये चंद्रोदयसत्वेऽसत्वे
वा पूर्वैव मातृविद्धो गणेश्वर इति वचनात् श्रावणशुक्लचतुर्थ्यां मध्याह्नव्यापिनी ग्राह्या श्रावणे का

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰ विष्णुपुराणवचनं पठेत् अथ का[illegible]कि[illegible]स्य चतुर्थी करकचतुर्थी व्रतमुक्तं वामनपुराणे करकचतुर्थी चंद्रोदया
१५ द्विगता विधेया वैधव्य वि[illegible]त्रस्ति विधौ समर्थ्या गौरीव्रतं वेदमती प्रदिष्टमिति सिद्धांतः इयं प्रदोषव्यापिनी
ग्राह्या दिनद्वये तद्व्याप्तौ पूर्वेति सिद्धांतः यत्तु केश्चिदुक्तं दिनद्वये तद्व्याप्तौ संकल्पकालमारभ्य परेति तन्न चतु
र्थी तु तृतीयायां महापुण्यफलप्रदेति ॥ ब्रह्मवैवर्तात् अत्र कृत्यविशेषो संवत्सरप्रदीपे ॥ अथाश्विने
कृष्णपक्षस्य चतुर्थ्यां रात्रियोगतः मण्डपे वा स्थितः पूज्यो राजा दशरथ स्त्रिया दुर्गाचत्वरे संपूज्या सर्वसौ
भाग्यवृद्धये इति अत्राश्विनो मुख्यश्चांद्रमासो मांतो नेति ॥ कार्तिकशुक्लचतुर्थी सा मध्याह्नव्यापिनी दिन
द्वये तद्व्याप्तावव्याप्तौ परा तथा च माधवः पूर्वेद्युरेव तद्व्याप्तौ पूर्वा सर्पप्रियातिथिः नो चेत्सर्पस्य पंचम्यां योगो
त्पन्ने प्रशस्यत इति युग्मं मध्यं दिनं यत्र तत्रोपोष्य फणीश्वरान् क्षीरेणाप्याय्य पंचम्यां कार्तिके कारये द्विदं
विषारीस्तस्य नश्यंति न तर्हि सिंति पन्नगा इति स्कांदात् अथ माघशुक्लचतुर्थ्यां गौरीचतुर्थी व्रतं इयम
पि पूर्वा गौरीव्रतत्वात् तृतीयायोगप्रशस्त्यात् सर्वासु चतुर्थीषु ढुंढीपूजोक्ता काशीखंडे माघशुक्लचतुर्थी
तिलः चतुर्थी अस्यामपि गणेश्वरस्य मध्याह्नपूजनादि महोत्सवः कार्य्यः इयं ढुंढिपूजनव्रते तु प्रदोषव्या
पिनी ग्राह्या दिनद्वये तद्व्याप्तौ पूर्वा इयमपि कुंदचतुर्थी अत्र कुंदः सुपुष्पैः शिवपूजनं कार्यमिति कौर्मोक्तेः
अथ माघकृष्णचतुर्थ्यां संकष्टनाशनव्रतम् ॥ तत्र यं चंद्रोदयव्यापिनी ग्राह्या चंद्रोदये यता मुख्यास्तंक १५

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰ र्तिकेवा सल चतुर्थ्यां दूर्वागणपतिव्रतं इयं मध्यान्हव्यापिनी दिनद्वये तथात्वे पूर्वा अत्रस्कांदे स्यपि शुक्लचतु
१२ र्थीषु कपर्दीश्वर विनायकव्रतं व्रतार्के स्कंदात् मध्यान्हव्याप्तिस्तु आसां गणेशव्रतमात्रे पूर्वोक्ता पूर्वविद्
द्धात्वमेव अथ भाद्रपद कृष्णचतुर्थी बहुलाख्या सास्मायान्हव्यापिनी ग्राह्या दिनद्वये तथात्वे पूर्वा अत्र गो
पूजा जवाल प्राशनं न कार्य्यं इति दिवोदासीये इयमेव सोमकल्यादि अथ भाद्रपद शुक्ल चतुर्थ्यां सिद्धि
विनायक व्रतं अत्रापि मध्यान्हव्यापिनी ग्राह्या मध्यान्हे गणेश पूजा विधानात् तदुक्तं भविष्योत्तरे मा
सि भाद्रपदे शुक्ले चतुर्थ्यां पूजयेन्नृप मासि माघे श्रावणे च मार्गशीर्षे यथा भवेत् गजवक्त्रं शुक्लायां
मध्यान्हे पूजयेत्सदेति दर्शनात् अत्र व्रते च तत्सत्तु चतुर्थ्या वरदः स्मृतेति प्राचीनोक्तिः दिनद्वये तद्व्याप्ता वा
तः समव्याप्तौ पूर्वैव मातृविद्धो गणेश्वर इति वचनात् इयं च रविभौमयोरति प्रशस्ता भाद्रशुक्ला चतुर्थी या
भौमेनार्केण वा युता महती सात्र विघ्नेशमर्चित्वेष्टं लभेन्नरः इति निर्णयामृते वाराहोक्ते अत्र चंद्रदर्शनं
चतुर्थ्यां निषिद्धं तदुक्तम् भाद्रमासि चतुर्थ्यां तु शुक्ले चंद्रस्य दर्शनं मिथ्याभिदूषणं कुर्यात् न पश्येत्तमतो
नृपति पुराणांतरात् सिंहादित्ये चतुर्थ्यां तु इति केचित् हि वदंति तदुक्तम् कन्यादित्ये चतुर्थ्यां तु शुक्ले चंद्रस्य
दर्शनं मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्नतं सदेति पाराशरः तदपि भाद्रसिंहयोरेव दैवाद्दृष्टे सति तद्दो
षशांत्यै तत्र मंत्रः सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः सुकुमारक मा रोदीस्तव ह्येष स्यमंतकः ।इति २३

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰ र्द्वयोश्चतुर्थिका दिनद्वये तथा त्वेतुमाह ३ विशाखायास्य: इति दिनद्वये चंद्रोदयव्यापिनी सत्वे वा पूर्वैव चतु
१५ र्थी तु तृतीयायां महापुण्यफलप्रदा कर्त्तव्या व्रतिभिः वत्स गणनाथप्रीतो विरोति ब्रह्मवैवर्त्तात् अत्र ग
णेशस्य महोत्सवः कार्य्यः लड्डुकाद्यनेकविध संभारादिभिः पूजनं ब्राह्मणतोषणं च कार्य्यमिदं संकष्ट ना
शन व्रतं सर्वासु कृष्णचतुर्थीषु कामनाभेदेन कार्य्यम् स्कांदे तु श्रावणे अपि विशेषतः संकष्टनाशन चतु
र्थी व्रतमुक्तं तत्र केचिच्छ्रावणे ऽमांतमासे नेति वदंति तदपि युक्तम् भाद्रकृष्णचतुर्थ्यां क्वचित् क्वचित्
विशेषतः गणेश महोत्सव दर्शनात् श्रावणे बहुलेपक्षे चतुर्थ्यां तु विधूदये गणेशं पूजयित्वा तु चंद्राया
र्घप्रदीप इति स्कांदात् इति निर्णयदर्पणे चतुर्थी प्रकरणम् अथ पंचमी सा उपवासव्रतादौ स्कंदव्रत
नागव्रत भिन्ना पूर्वा प्रतिपच्च पंचमी चैव सा विद्धा भूत पूर्णिमा नवमी दशमी चैव नोपोष्या परसंयुतेति
ब्रह्मवैवर्त्तेति चमत्कारचिंतामणिः पंचमी नागपूजायां कार्य्या षष्ठी समन्विता तस्यां च तोषिता नागा
इतरा स चतुर्थिकेति चतुर्थी संयुता कार्य्या पंचमी परया न तु दैवकर्मणि विज्ञेया शुक्लपक्षे तथासिते इति
हारीतोक्तेः सर्वत्र पंचमी पूर्वा कार्य्या स्कंदव्रते परेति माधवः एषामुपवासव्रतविषयत्वादन्यत्र कृष्णा पू
र्वा सिता परेति केपि कृष्णा पूर्वयुता सिता परयुतास्यात् पंचमीति दीपिकोक्तेः हेमाद्रिमते त्वेवं इति
सामान्य पंचमी निर्णयः विशेषस्त्वेतत्प्रसंगादुच्यते श्रावणशुक्ल पंचमी नागपंचमी सा परयुता २५

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

पमा। तत एव श्रावणे पंचमी शुक्ला संप्रोक्ता नागपंचमीति॥ परित्यज्य पंचम्यं चतुर्थीसहिता हितेति द्वयमेव गौरुका
स्यादित्यत्रैवाविरोधः॥ पवित्रारोपणमुक्तं द्वादश्यां श्रावणे मासि पंचम्यां अथवा विभो। द्विज अनुकूले तु कर्तव्यं
पंचदश्यां पवित्रकं इति विष्णुरहस्यात् शिवपवित्रारोपणं तु तत्रैवोक्तः आषाढांते चतुर्दश्यां नभस्य नभसः
स्तथा अष्टम्यां च चतुर्दश्यां उभयोः पक्षयोरपि पवित्रारोपणं। विघ्नाच्छ्रावणे न भवेद्यदि कार्तिकावधि शुक्ला
स्तु कर्तव्यमिति नारदोक्तेः पवित्रारोपणं तु सर्वभवान्यादिदेवतानामपि चतुर्दश्य पक्षयोर्भवति इदं नित्यम् अत्र
सर्ववर्णानामधिकारो विष्णुरहस्योक्तः पवित्राधिवासनं तु पूर्वदिने गोदोहनसमये कार्यं गोदोहानंतरं तु काले
पूर्वेद्युरधिवासनमिति श्रावणशुक्लपंचमी नागपंचमीति पूर्वोक्ता तत्र विशेषमाह हेमाद्रौ भविष्ये श्रावणेमा
सि पंचम्यां शुक्लपक्षे नराधिपः द्वारस्योभयतो लेख्या गोमयेन विषोल्बणा पूजयेद्विधिवद्वीर दधिदूर्वांकुरैः कुशैः
गंधपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः। ये तस्यां पूजयंतीह नागान् भक्तिपुरःसराः न तेषां सर्पतो वीर भयं भवति
कुत्रचित् इति पंचम्यां पूजयेन्नागाननंतताद्यान्महोरगान् क्षीरं सर्पिस्तु नैवेद्यं देवस्य वैश्रवणावहमिति देवीपुरा
णात् अथ भाद्रशुक्लपंचमी ऋषिपंचमी सा मध्याह्नव्यापिनी ग्राह्या ब्राह्म्य भाद्रपदे मासि शुक्लपक्षस्य पंचमी
तस्यां मध्याह्नसमये नद्यादौ विमले जले इत्युपक्रम्य पूजयस्व ऋषीन् दिव्यान् रुधत्या समन्वितानिति भवि
ष्योक्तेः अत्र चातुर्वर्ण्यानां स्त्रीणां अधिकारो भविष्योत्तरे उक्तः दिनद्वये तद्व्याप्तावव्याप्तौ वा विषमपरा उपोष्य व्रत १६

स्याद्याभावात् उपोष्य इते पूर्वं मुक्तमेवच अन्यानागेन पञ्चा ०हत्ला कृष्णभक्ष्यण मुक्ता अस्यामेव नागा हर्षोल्लासम्
व्रतार्के चोक्तम् आश्विनिशुक्ल पंचम्यां शुपाग ललितान्व्रतम् अत्रपूजैव धानागा अत्रेयं मध्यान्हव्यापिनी
ग्राह्या तथा यां पूजाया मध्यान्हकालस्योक्तत्वात् दिनद्वये तद्व्याप्तौ वाव्याप्तौ पूर्वा उपोष्य व्रतत्वात् केचिज्जागर
णंगत्वाद्रात्रिव्यापिनी निवदंतीति तच्चिन्त्यं वहु व्रते प्रराणत्रिव्याप्ता पातित्वात् मार्गशीर्षशुक्लपंचम्यां नागपूजा
अत्रेयं परविद्धैव अथमाघशुक्लपंचमी वसंतपंचमी अत्र रतिकामयोः पूजनं कार्य्यम् माघमासे शुक्लेच शु
क्लायां पंचमीतिथौ रतिकामौतु संपूज्यौ कर्तव्यः सुमहोत्सवः दानानिच प्रदेयानितेन तुष्यतिमाधवः इतिव
राहात् इयमेव श्रीपंचमीतिकथ्यते अत्र लक्ष्मीपूजनं हेमाद्रौ उक्तं इयं पूर्वान्हव्यापिनी दिनद्वये तथात्वेपरे
पोष्य व्रताभावात् इति निर्णय दर्प्पणे पंचमीप्रकर्णं अथषष्ठी सातुस्कंद व्रतातिरिक्ता परैवेतितदुक्तं नाग
विद्धान कर्तव्या षष्ठी चैव कदाचनः सप्तमी संयुताकार्य्या षष्ठी धर्मार्थ चिंतकैरिति स्कंदात् एकादश्य
ष्टमी षष्ठी पौर्णमासी चतुर्दशी अमावस्यापात्तृतीयाचता उपोष्याः परान्विते ति वृहस्पत्युक्तेः नगावि
द्धातुयाषष्ठी मुनिविद्धातु अष्टमी दशम्येकादशी विद्धा त्रयस्यानरकं व्रजेत् इति षण्मुख्यो रितिग्रम
वाक्यच्च माधवीयविना गविद्धा स्कंद षष्ठी सातिषिद्धव्रतातदिति अत्र योगविशेषः षष्ठीच सप्तमीचैववा
रश्चेद् शुमालिनः योगोयं पद्मकोनाम सूर्य्यकोटि ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

नि.
१८

ग्रहैः समः इति सामान्यनिर्णयः अथान्या षष्ठी उच्यते आषाढशुक्लषष्ठी स्कंदषष्ठी सा पूर्वविद्धा ग्राह्या तदु
क्तं स्कांदे कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिश्चतुर्दशी एताः पूर्वयुताः कार्याः तिथ्यंते पारणं भवेदिति परवि
द्धा मात्रशास्त्रे तु परैव भाद्रकृष्णहलषष्ठी उच्यते सा परविद्धा ग्राह्या हलधरजन्मात् निवलभद्रषष्ठीति भाद्र
शुक्लषष्ठी ललिताव्रतं सा परयुता कार्या इयमेव पुराणकल्पादिः इयमेव सूर्यषष्ठीत्युच्यते अत्र भा
स्करपूजनं अश्वमेधफलमुक्तं इयमपि परविद्धा आश्विनकृष्णे योगविशेषात्कपिलाषष्ठी तदु
क्तं वाराहपुराणे समुच्चये भाद्रमासि सिते पक्षे भानौ चैव करोस्थिते पाते कुजे च रोहिण्यां सा षष्ठी कपि
लास्मृतेति दर्शनात् अथास्मिन्मते नभाद्रग्रहणं इयं योगबलाधिके न पूर्वा परा पित्रैया अत्र कपुयान
फलमुक्तं भास्करस्य विशेषतः पूजनं गंगास्नानादिकं च कार्यं इयमेव चंद्रषष्ठी चंद्रोदयव्यापिनी ग्राह्या
अपरत्र तथात्वे पूर्वा पूर्ववचनबलात् तदुक्तं नहृद्भाद्रपदे मासि षष्ठ्यां पक्षे सिते तरे चंद्रषष्ठी व्रतं कुर्या
त्पूर्ववेधः प्रशस्यते चंद्रोदये यदा षष्ठी पूर्वाह्ने चापरेहनि चंद्रषष्ठ्यां सिते पक्षे सैवोपोष्या प्रयत्नतः इति
व्रतार्के अत्र भाद्रो दर्शनो ज्ञेयः कुत्रचिद्दृष्टविशेषे पौर्णमांतेनैव गृह्णंति ॥ कार्तिकशुक्लषष्ठ्यां कृत्यवि
शेषः षष्ठ्यां फलाशनो राजन् विशेषात्कार्तिके नृप राज्याच्युतो विशेषेण स्वराज्यं लभते चिरात् स्कंदपू
जनमप्यत्र कार्यम् इयं परविद्धा अथ मार्गशुक्लषष्ठ्यां मल्लारीपूजा सा चोत्तरविद्धा इयमेव योगविशे १८

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि. षोपाख्यपाभिधानं तदुक्तम् ब्रह्मांडे मार्गभाद्रपदे शुक्लाषष्ठी वैधृतिसंयुता रविवारेणसंयुक्ता साचंपेति प्र
१९ कीर्तिता इति मदनरत्ने तु विशाखाभौमयोगाभ्यां साचंपेति प्रकीर्तिता इत्यपि पाठः अत्र स्नानदाना
दि कृतं महत्फलप्रदं क्वचिदियमपि स्कंदषष्ठीत्युच्यते स्कंदव्रतं तु महाभिलाष प्राप्त्यर्थं सर्वास्वपि
षष्ठीषु भवति इति भविष्ये इति निर्णयदर्पणे षष्ठी प्रकरणम् ॥ अथ सप्तमी तु पूर्वविद्धैव कर्तव्या तथा स
प्तमी च कर्तव्या तात सर्वदेति स्कंदात् षण्मुन्योरिति युग्म वाक्याच्च पूर्वविद्धाया अभावे केवल परविद्धा प्राप्तौ
सैव ग्राह्या अभावे पूर्वविद्धाया परविद्धापि गृह्यत इति माधवः इति सामान्यतो निर्णयः अथ पुराणोक्त सप्तमी
व्रतान्युच्यंते अथ वैशाख शुक्ल सप्तम्यां गंगोत्पत्तिः इयं शिष्टाचारतो मध्याह्न व्यापिनी ग्राह्या दिनद्वये तद्व्याप्तौ
तद्व्याप्तौ वा पूर्वैव युग्म वाक्यात् केचित्कालव्यवस्थयेयं मापि श्रीगंगा जयंतीति वदंति दर्शांतमासेन श्रावणकृष्ण
सप्तम्यां शीतलाव्रतमुक्तं भविष्ये इयं पूर्वविद्धा ग्राह्या युग्म वाक्यात् ॥ अथ भाद्रपद शुक्ल सप्तम्यां मुक्ताभरणव्रत
ं तत्र शिवशिवापूजनं डोरकग्रहणं मुक्तं भविष्ये ॥ इयं पूर्वविद्धा पूर्वोक्तात् मध्याह्न व्यापिनी त्वपरेतेपि दिनद्वये
तद्व्याप्तौ अव्याप्तौ पूर्वैवेति वदंति तत्त्वं सत् ॥ अथाश्विन शुक्ल सप्तम्यां देवी व्रतपूजनमादौ परानद्युक्तं नंदि
केश्वर पुराणे भगवत्या प्रवेशादि विसर्गांता अथ याः क्रिया तिथ्यावृद्ध युगान्मन्यां सर्वास्ताः कार्ये बुध इति अन्य
च युगाद्यावर्षवृद्धिश्च सप्तमी पार्वतीप्रिया रवेरुदयमीक्षंते न तत्र तिथि युग्मतेति भविष्योक्तेः ॥ १९

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि· अथ द्वितीय दिने घटिका मात्र सप्तमी सत्त्वेऽपि परेऽपि तृतीयवास नियमे घटिके कापि या भवेदिति देवलोक्तेः अत्र मूल
२० नक्षत्रे सरस्वतीस्थापन मुक्तं मूलर्क्षे च सुराधीश पूजनीया सरस्वती पूजयेत्प्रत्यहं देवि याबद्वै श्रवणर्क्षकं नाध्या
पयेन्न विलिखेन्न पठेत्स्वयमेव च पुस्तके स्थापिते देवि विद्याकामो द्विजोत्तम इति रुद्रयामलात् गौडनिबंधे देवी
पुराणेऽपि ज्येष्ठानक्षत्र युक्तायां षष्ठ्यां बिल्वाभिमंत्रणं सप्तम्यां मूलयुक्तायां पत्रिकाया प्रवेशनं पूर्वाषाढ युताष्ट
म्यांपूजा होमाद्युपोषणं उत्तरेण नवम्यां तु बलिभिः पूजयेच्छिवां श्रवणेन दशम्यां तु प्रणिपत्य विसर्जयेत्
इति अत्र सर्वत्र तत्तन्नक्षत्र योगादिपरो मुख्यः तेन पत्री प्रवेशादौ मूलादियोगे पूर्वविद्धा परविद्धापि ग्राह्या वलाद्धृदी
तव्या तदभावे तिथिः केवलैव पराह्ण व्यापिनी ग्राह्या तदुक्तं देवलेन तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनं योगाभावे
तिथिर्ग्राह्या देव्याः पूजन कर्मणीति लिंगेति मूलाभावेऽपि सप्तम्यां केवलायां प्रवेशयेदिति बिल्वाधिवा
सनं पत्रीप्रवेशात्पूर्वे दिने सायं काले कर्तव्यम् तत्र षष्ठीयोगे अति विशेषमाह षष्ठ्यां सायं प्रकुर्वीत वि
ल्व वृक्षादि वासन मिति सिद्धांतः नवरात्रि करणाशक्तौ सप्तम्यादि त्रिरात्रि व्रतं कार्यं तदुक्तं त्रिरात्रं वा
पि कर्तव्यं सप्तम्यादि यथाक्रमदृति दूयमेव बृहत्कल्यादि ग्रन्थकार्तिक शुक्ल सप्तमी वैकुंठ कल्यादिसा
पूर्वा अथ माघ शुक्ल सप्तमी रथसप्तमी सा अरुणोदय व्यापिनी ग्राह्या दिनद्वये तथात्वे पूर्वैव सूर्यग्रहणतु
ल्यात् शुक्ल माघस्य सप्तमी अरुणोदय वेलायां तस्यां स्नानं महाफलमिति विष्णु वचनात् अस्यां सरयं २०

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰ हैमं सर्पं संपूज्य द्विजाय दद्यात् अत्रैव लोलार्के गंगास्नानमुक्तम् दूयं मन्वादिरपि तत्र श्राद्धमपिंडं कार्यं इत्येवं
२१ वा ऽचलासप्तमी तत्रा चलजले रुणोदये स्नानं महत्पुण्यप्रदमिति भविष्योत्तरात् अत्रेयं पूर्वविद्धा ग्राह्या अत्रा
पि सूर्यपूजनं अस्यामेव पुत्रसप्तमी व्रतमुक्तं व्रता ऽर्के तत्रेयं पूर्वविद्धा इति निर्णयदर्पणे सप्तमी प्रकरणम्॥ ७॥
अथाष्टमी ०८ सा कृष्णा पूर्वा सिता परा तदुक्तं दीपिकायाम् परयुक् शुक्लाष्टमी पूर्वयुग कृष्णेति माधवीये पित्र
तमाते ष्टमी कृष्णा पूर्वा शुक्लाष्टमी परेति सर्वत्र सिद्धांतः अत्र केचित्तमतं तेन मेरुतंत्रादिवचनैर्महाष्टमीषु दुर्गा
व्रते कृष्णां निशीथगां शुक्लां प्रदोषगां स्वीकुर्वंति तदुक्तं देवियामले निशीथगाष्टमी कृष्णा शुक्लायां प्रदोषगा
छत्रिहिसत्वे त्वसत्वे च परा देवी व्रते शुभेति अत्राष्टम्यां ८ देवीव्रतं नित्यं व्रताकरणे प्रायश्चित्तमाह माधवीये
कात्यायिनः अर्के पर्वद्वये रात्रौ चतुर्दश्यष्टमीदिवा एकादश्यामहोरात्रं भुक्त्वा चांद्रायणं चरेदिति काम्यपी
यम् तदुक्तं दुर्गातंत्रे शुक्लाष्टमी मुख्यकरी प्रदोषगां कृष्णां सदा यः कुरुते निशीथगां लाभे त्वलाभे विपरीतमेद
शिभोगान्सुभुंक्ते इव मोदमेति निदर्शनानेन केवलदेवीव्रतत्वेयं निर्णयः अन्यव्रते तु पूर्वोक्त एवेति सिद्धांत शि
ष्ट कालादि वोदासीये भविष्यात् संध्याकाले तथा चैत्रे सुप्ते देवे जनार्दने बुधाष्टमी न कर्तव्या हंति पुण्यं पुरा कृ
तमिति इति सामान्यतो निर्णयः अथ विशेषतो ऽष्टम्यां उच्यंते अथ चैत्रशुक्लाष्टम्यां भवानीव्रतं तत्र परा ग्राह्या
अत्रैव भवानीपूजनं दर्शनं च कार्यं तदुक्तं काशीखंडे भवानीं यस्तु पश्येत शुक्लाष्टम्यां मधौ नरः न जातु शोकं लभते २१

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰ सदानंदमयो भवेदिति अत्रैव अशोककलिकाप्राशनमुक्तं अत्रैव लौहित्ये जलेस्नानमुक्तं अथ श्रावणांतेनभा
२२ द्रकृष्णाष्टमीनाममनोर्थे नस्य जन्माष्टमीति प्रसिद्धा अथ जन्माष्टमी तदुक्तं च भविष्ये कृष्णपक्षेष्टमी यानु
समये कृष्णजन्मतः कर्तव्यं भाद्रके राजन् प्रोक्ता जन्माष्टमीति सेति अस्यामुख्य कालो ऽर्द्धरात्रे रोहिणीयो
गाद्याह्या तदुक्तं पाद्मे यदानुहृरूपते वत्स भाद्रकृष्णाष्टमी शुभा निशार्द्धे रोहिणी यत्र तत्र जातो यतो हरीति दि
नद्वयेन ह्याप्तौ यदिने ऽर्द्धरात्रे रोहिणीयोगः सैव ग्राह्या तदुक्तं वन्हिपुराणे समायोगे तु रोहिण्यां निशीथे रा
जसत्तम समपायत गोविंदबालरूपी जनार्दन तस्मात्तं पूजयेत्तत्र यथावित्तानुरूपतः इति तत्र पूर्वदिने एवा
र्द्धरात्रे रोहिणीयोगे निर्णयसिंधौ वन्हिपुराणादुक्तं सप्तमीसंयुताष्टम्यां वर्जयेत्सर्वदा बुधैः तत्र परदिने ए
वार्द्धरात्रेष्टम्यां रोहिणीयोगे स्कांदे उक्तं उदये चाष्टमी किंचिन्नवमी सकला यदि भवेत्तु बुधसंयुक्ता प्रा
जापत्यर्क्षसंयुता अपि वर्षशतेनापि लभ्यते वा यन वानवेति इति सिद्धांतः दिनद्वये ऽर्द्धरात्रे रोहिणीसंयुताष्टमी
सत्वे परा एतद्विषयमेव ब्रह्मवैवर्तीयमिदं वचनं सरित्स्नापित कर्तव्या सप्तमीसंयुताष्टमीति दिनद्वये ऽर्द्धरा
त्रे रोहिण्यभावे छन्दे निशीथेष्टमी सत्वे वा नवेति परा एतद्विषयमेवे वदतीति यं ब्रह्मवैवर्तीयं वचनं वर्जनीया
प्रयत्नेन सप्तमीसंयुताष्टमीति दिनद्वये ऽर्द्धरात्रे ऽष्टम्यभावेपि परैव ग्राह्या संकल्पकाले त्वाभान इति जन्मा
ष्टमी अथ पारणा अत्र तिथ्यंते नक्षत्रांते वा पारणं कार्यं तिथिमांते च पारणमिति ब्रह्मवैवर्तात् तिथि। २२

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰ नक्तव्रतेयत्त्वर्द्धरात्रे कुर्यात् तिथ्यंते चोत्सवांते वा व्रती कुर्य्याच्च पारणं मिति कालादर्शे वचनं अष्टम्या मथ
२३ रोहिण्यां न कुर्यात्पारणं बुधः शतजन्मकृतान्यायान्मुच्यते नात्र संशयः हन्त्यात्पुरा कृतं कर्म उपवासा
र्जितं फलं तिथिरष्टगुणं हंति नक्षत्रं चतुर्गुणं: तस्मात्प्रयत्नतः कुर्यात् तिथिभांते च पारणं इयमष्ट
म्या रोहिणी सहिता योगाज्जयंती कथ्यते तदुक्तं माधवीये वशिष्ठसंहितायां॥ श्रावणे वा नभसे वा रोहिणी सहि
ताष्टमी यदा कृतं सनरैर्लब्ध्वा सा जयंतीति कीर्तिता श्रावणे न भवेद्योगो नभस्ये तु भवेद्ध्रुवमिति इयमर्द्धरात्रिव्यापिनी
तुक्ता: निशीथव्याप्त्यभावे यत्र कुत्राष्टम्यां नक्षत्रमात्रेयोगमात्रा अष्टमी नवमी रोहिणी योगे तु महत्फलमुक्तं
तत्रैव बुधयोगश्चेत्किमुतसर्वेषामर्द्धरात्रव्याप्त्यादौ जन्माष्टम्या अपि तत्रैवांतर्भावः इतितु पूर्वोक्त एव इयं नि
त्यं तदुक्तं न करोति यदा विष्णो जयंतीसंभवं व्रतं यमस्य वशमापन्नः सहते नारकीं व्यथामिति अत्र जन्माष्टमी
व्रते र्द्धरात्रे रोहिणी योगेतिप्रशस्ता तदुक्तं॥ रोहिण्यामर्द्धरात्रे च यदा कृष्णाष्टमी भवेत् तस्यामभ्यर्चनं शौरेः हंति पापं
त्रिजन्मजमिति भविष्यादि वचनं इयं काम्यमपी महाजयार्थं कुरुतां जयंतिं मुक्तये नाथ धर्ममर्थं च कामं च मोक्षं च मु
निपुंगव: ददाति वांछितानर्थान्ये तिस्का दात् इयं व्रतं नित्यं श्रावणे बहुले पक्षे कृष्णजन्माष्टमी व्रतं न करोति नरो
लि यस्तु स भवेत् क्रूरराक्षसः कृष्णाष्टमी प्राप्ते येन भुक्तं द्विजोत्तम त्रैलोक्यजनितं पापं भुक्तं तेन न संशयः येन कु
र्वंति जानंतः कृष्णजन्माष्टमीव्रतं ते भवंति महाप्रज्ञव्या ॥॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ २३

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰ लाभवति कानने इति विष्णुपुराणवचनात् जन्माष्टम्यां च भुक्त्वा मुपोष्यः तदुक्तं भृगोश्च मतं रोहिणी चाष्टमी यु
२५ क्ता सप्तम्यां कलयान्विता सा तिथिर्निःफला त्याज्या तस्यां नोपवसेत् द्विजः नवमीरोहिणीयुक्ता अष्टम्यां कल
यान्विता उपवासस्तु कर्तव्यो महापापप्रणाशनः कृष्णायां श्रावणेऽष्टम्यां स्यात्स्वल्पा रोहिणी यदि तदा तं कारये
द्व्रतया वैः सर्वैर्विष्णुतत्परैः इति विष्णुधर्मे त्रियामां रजनीं प्रह्व त्यक्त्वा धं तच्चतुष्टयं नाडीनां तदुभे संध्ये दिनस्यादं
संज्ञितं जन्माष्टम्यां च भुक्त्वा यं तु पोष्यके वलं नरः इति दिक् अश्वमेधफलं तस्य व्रतं जागरणं विना यच्चाल्पेप
च कौमारे वार्द्धके यच्च यौवने सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः श्रीकृष्णजन्मदिवसे यस्तु भुंक्ते नराधम
संभवेन्मात गावः ब्रह्महत्याशतं लभेत् कोटिजन्मार्जितं पुण्यं तस्य नश्यति निश्चयं अन्नं ह्यश्नाति शुचिः अन्नं देवे
पैत्रे च कर्मणि अन्ते वसेत्कालसूत्रे यावच्चंद्रदिवाकरौ कृमिभिः शूलतुल्यैश्च तीक्ष्णतुंडैश्च भक्षितः पापीततः सम
त्याय भारते चेल्लभेज्जनिः षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः शुद्धः कोटिसहस्राणि सप्तजन्मानि शूकरः
श्वापदः सप्तजन्मानि शृगालः सप्तजन्म सु सप्तजन्म ततो भवेत् नरो मूको गलगंडेन कुष्ठी सप्तजन्म च ततो भवेन्म
गुप्तश्च व्यालग्राही ततो भवेत् तदंते च भवेद्दस्यु धर्महीनो नरघ्नकः ततो भवेत्स नरकः तैलकारस्ततो भवेत् ततो
देवलको ज्ञेयो ब्राह्मणश्च सदाशुचिः उपवासासमर्थश्चेदेकं विप्रं प्रभोजयेत् तावद्धनानि वा दद्याद्यद्भुक्तौ द्विगुणं
भवेत् सहस्रसम्मितां देवी जपेद्वा प्राणसंयम मिति ब्रह्मवैवर्ते कृष्णखंडे ९४ अ॰ ध्यायेन्नारायणो नोक्तं नार २५

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि. दाय व्रते नाराध्यंदेवेशंदेवक्यासहितं हरिं त्यक्त्वायमपथ्यं घोरं याति विसोपरंपदमिति जन्माष्टमी व्रतं ये
२५ वै प्रकुर्वंति नरोत्तमाः कारयंति च वाला कान् लक्ष्मीस्तेषां सदास्थिरा मरणं वासुदेवस्य मृत्युकाले भवे
त्स्मृतिः सिद्धंति सर्वकार्याणि कृते जन्माष्टमीव्रते इति विष्णुपुराणे इत्यादिवचनेन उपवास व्रत
करणे एहि कामः इति जन्माष्टमीव्रतनिर्णयः अथ भाद्रशुक्लाष्टमी सा च नवला शुक्लापवा कृष्णा
पूर्वा ग्राह्या तदुक्तं भविष्ये शुक्लाष्टमी तिथिर्यातु मासि भाद्रपदे भवेत् दूर्वाष्टमी तु सा कार्या नोत्तरा सा वि
धीयत इति यत्तु मुहूर्ते रोहिणीष्टम्यां पूर्वा वाय दिवा परा दूर्वाष्टमी तु सा कार्या ज्येष्ठा मूलं च वर्जयेत् इ
ति परविद्धा यामपि प्राप्ति वाक्यं गतपूर्वदिवसे ज्येष्ठा योत्तेय तदुक्तं परा ऽर्के ऐंद्रर्क्षे पूजिता दूर्वा हंत्यप
त्यानि तान्यपा भर्तु रायुर्हरा मूले तस्मात्तां परिवर्जयेदिति दिनद्वये ज्येष्ठा मूल योगे तत्रैवोक्तम् कार्त
व्यात्वेक भक्तेन ज्येष्ठा मूलं यदा भवेत् दूर्वामभ्यर्चयेद्भक्त्या कवध्यं दिवसं नयेदिति व्रतार्के इदमन्तस्त्य
दयेतत्पूर्वं कृष्णपक्षे सिंहार्के एव कार्यं तदुक्तं अधिमासे तु संप्राप्ते नभस्य उदये मुनिः अर्वाक् दूर्वाव्र
तं कार्या त्परतो नैव कुत्र चिदिति व्रतार्के स्कांदेपि अस्त्रीणां एवाधिकार इदं व्रत स्त्रीणां नित्यं अनग्निप
कमश्नीयादत्तं दधिपुलं तथा अक्षारलवणं ब्रह्मन्भायामधुनान्वितमिति भविष्यात् अत्रैव ज्येष्ठापूजनं कार्यं तदुक्तं
मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठामध्यान्हादूर्द्ध्वमथ्यरा ज्येष्ठायाः परिपूजनमिति अस्यापवादः यस्मिन्दिने भवेज्ज्येष्ठा मध्या २५

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि. इदं केवल निषेधे केवल नक्तेन च विधानविशेषः तदुक्तं मत्स्यादिकं निषेध्य प्रोक्तं यज्ज्येष्ठादौ व्रतं प्रति ज्येष्ठा प्रपद्या
२६ विहितं केवलो द्विभिः तिथ्यावेव चरेकाद्यं हितियं केवलं नक्तं। इतिमात्स्यात् दाक्षिणात्यास्त्वेवं चरं तिमैत्रेण
स्यास्त्वेवं चरंति मैत्रेणावाह देवीं ज्येष्ठायां तु प्रपूजयेत् मूले विसर्जयेद्देवीं त्रिदिनं व्रतमुत्तमं अत्र रविवारे
ज्ञातिविशेषः तत्राष्टम्यां यदा वारे भानोर्ज्येष्ठ ऋक्षमेव नी लज्येष्ठेति साप्रोक्ता दुर्लभा वहुकालके इतिस्कंदात्
अत्र पाश्विनाष्टम्यां महालक्ष्मी व्रतारंभः तत्र चंद्रोदयव्यापिनी ग्राह्या दिनद्वये तथा त्वेवं परा ग्रासाः अथाश्विनि क
अस्यामेवाष्टम्यां महालक्ष्मी व्रतारंभः तत्र चंद्रोदयव्यापिनी ग्राह्या यदा परदिने चंद्रोदयादूर्ध्वं त्रिमुहूर्तगा भव
ष्टाष्टम्यां महालक्ष्मी व्रतसमापनम् अत्र चंद्रोदयव्यापिनी ग्राह्या यदा परदिने चंद्रोदयादूर्ध्वं त्रिमुहूर्तगा भव
तिनदा परैव त्रिमुहूर्तापि सा पूज्या परतश्चोर्ध्वगामिनि निमदनरत्ने अन्यच्च अर्द्धरात्रे मतिक्रम्य वर्तते यो तरा
सिः तदा तस्यां तिथौ कार्य्यो महालक्ष्मी व्रतं सदेति संग्रहोक्तेः अथाश्विनिशुक्लाष्टमीमहाष्टमीति सापरयुता
ग्राह्या सप्तम्या कलामात्र वेधस्यापि निषेधात् सप्तमी स्वल्पसंयुक्ता वर्जनीया महाष्टमी स्तोकापि सा मद
पुराणे यातु सूर्य्योदये भवेदिति यत्तु महाष्टमी पूजा नवमी संयुता चरेत् सप्तमी संयुता चेत्स्यात् शोकसं
ताप कारिणी तिमदनरत्नात् तत्र विशेषमाह यदा महाष्टमी पूजा नवमी संयुता सदा सप्तमी संयुता नित्यं शोक
संताप कारिणी जंभेण सप्तमीयुक्ता पूजिता तु महाष्टमी। चंद्रेणा निहतो जंभे स्तस्मा दानवपुंगवः तस्मात्सर्व प्र २६
यत्नेन सप्तमी मिश्रिताष्टमी वर्जनीया प्रयत्नेन नगरजैः श्रमकादिमिः इति यदा तत्पर सा तु सप्तमी विद्धाष्टमी

CC-0.Courtesy Shri K.S.Parihar,Librarian Government District Library Varanasi. Digitized by eGangotri

मिलतिनदा सैवग्राह्या तदुक्तं यदा सूर्योदयेनस्यान्नवमी चापरेऽहनि तदाष्टमी प्रकुर्वीत सप्तमीसहितां नृपेति स्मृतिसंग्रहोक्तेः अष्टम्यामुदिते सूर्ये इत्यादीनि वचनानि आश्विनि कृष्णाष्टमीविषया शिनिलो पिदेवीपुराणे पूजोक्तेः महाष्टम्या आश्विनेमीसोत्या दिवचनं परदिने अष्टम्यभावविषयं अहंभद्रे इत्यादि वचनं विष्टिकरणमध्ये विधानार्थं तदुक्तं अहं भद्रा च भद्राहं नावयोरंतरं क्वचित् सर्वसिद्धिप्रदास्यामि भद्रायामर्चनाद्यहं विष्टीत्यक्षामहाष्टम्यां मम पूजां करोति यः तस्या पूजाफलं तस्यात्तेनाहं सवमानिता इदं देवीपुराणोक्तेः इयमष्टमी नवमी कुजवार मूलनक्षत्रयोगे महानवमीति फलातिशयदा भवति तदुक्तम् अष्टम्यामुदिते सूर्ये दिनांतेन नवमी भवेत् कुजमूले भवेद्यत्र पूजनीया प्रयत्नतः इति मदनरत्नवचनात् आश्विन शुक्लपक्षेष्टमी मूलेन संयुता सामहानवमी प्रोक्ता त्रैलोक्ये पि दुर्लभेति स्कंदपुराणे इयमेवानन्या काम्या चोक्ते तत्रैव अत्र पुत्रवतोपवासो न कार्य्यः उपवासं महाष्टम्यां पुत्रवान्न समाचरेदिति मदनरत्ने अत्र बलिदानमवश्यमेव कार्य्यं तदुक्तम् कालीपुराणे तत्राष्टम्यां महापूजां विशेषेण समाचरेत् जागरं च स्वयं कुर्य्यात् बलिदानं महानिशीति अजाद्यासंभवे कूष्मांडनारिकेलादीनां बलिदानं कार्यं अत्रैव केषांचिन्मते हवनं अष्टमे दिवसे होमइति भावे भविष्यात् कार्तिक कृष्णाष्टमी कर्काभिधा सा चंद्रोदयव्यापिनी ग्राह्या दिनद्वये यदी व्याप्त्या वाव्याप्तौ पूर्वा अथ कार्तिक शुक्लाष्टमी सा गोपाष्टमी प्रोक्ता अस्यां गोपूजनं कार्यं इयं पराग्राह्याः इयमेव केदा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰ इदं केवल तिथौ केवल नक्षत्रे च विधानविशेषः तदुक्तं भत्स्यादिके तिथि युक्तं यजेज्ज्येष्ठादौ वतं प्रतिज्येष्ठा श्रवनं पश्चा
२६ पिहितं केवलो इभिः तिथ्या वैव चरेकृष्यं क्षितियं केवलदत्तः इतिभानस्यात दादितराज्या स्त्ये व चरं तिमैत्रेण
त्यास्त्ये वं चरंति मैत्रेणावाह देवीं ज्येष्ठायां तु प्रपूजयेत् मूले विसर्जयेद्देवीं त्रिदिनं व्रतमुत्तमं अत्र रविवारे
आतिविशेषः तत्राष्टम्यां यदा वारो भानोर्ज्येष्ठ ऋक्षमेव नी तज्ज्येष्ठेति सा प्रोक्ता दुर्लभा वहुकालके इति स्कंदात्
अस्यामेवाष्टम्यां महालक्ष्मी व्रतारंभः तत्र चंद्रोदयव्यापिनी ग्राह्या दिनद्वये तथा त्वे वं परा ग्राह्या आश्विनि क
ष्णाष्टम्यां महालक्ष्मी व्रतसमापनम् अत्र चंद्रोदयव्याप्तिर्ग्राह्या यदा परदिने चंद्रोदयादूर्द्ध्वं त्रिमुहूर्त्तगा भव
तितदा परैव त्रिमुहूर्त्तापि सा पूज्या परतश्चोर्द्ध्वगामिनीति मदनरत्ने अन्यच्च अर्द्धरात्रेमतिक्रम्य वर्त्तते योत्तरा ति
थिः तदा तस्यां तिथौ कार्य्यो महालक्ष्मी व्रतं सदेति संग्रहोक्तेः अथ आश्विनि शुक्लाष्टमी महाष्टमीति सा परयुता
ग्राह्या सप्तम्या कलामात्रवेधस्यापि निषेधात् सप्तमी स्वल्प संयुक्ता वर्जनीया महाष्टमी स्तोकापि सा महा
पुण्या यातु सूर्य्योदये भवेदिति अत्र तत्महाष्टमी पूजा नवमी संयुता चरे सप्तमी संयुता चेत् स्यात् शोकसं
ताप कारिणी ति मदनरत्नात् तत्र विशेषमाह यदा महाष्टमी पूजा नवमी संयुता सदा सप्तमी संयुता नित्यं शोक
संताप कारिणी जंभेन सप्तमीयुक्ता पूजिता तु महाष्टमी । चंद्रेण निहतो जंभस्तस्माद्दानव पुंगवः तस्मात्सर्व प्र
यत्नेन सप्तमी मिश्रिताष्टमी वर्जनीया प्रयत्नेन नरराजैः शुभकांक्षिभिः इति यदात्यल्पवसात्सप्तमी विद्धाष्टमी २६

मिलति तदा सैव ग्राह्या तदुक्तं यदा सूर्योदये न स्यान्नवमी चापरेऽहनि तदाष्टमी प्रकर्तव्या सप्तमीसहिताऽन्यथेति
ति स्मृतिसंग्रहोक्तेः अष्टम्यामुदिते सूर्ये इत्यादीनि वचनानि आश्विने कृष्णाष्टमीविषयाणि तथापि देवी
पुराणे पूजोक्तेः महाष्टम्यामश्विने मीनेत्यादिवचनं परदिने अष्टम्यभावविषयं अहं भद्रे इत्यादिवचनं विष्टि
करणमध्ये विधानार्थं तदुक्तं अहं भद्रा च भद्राहं नावयोरन्तरं क्वचित् सर्वसिद्धिः प्रदास्यामि भद्रायामर्च
नात्स्वहं विष्टीत्यक्त्वा महाष्टम्यां मम पूजां करोति यः तस्या पूजाफलं तस्या तेनाहं सवमानिता इति देवीपुरा
णोक्तेः इयमष्टमी नवमी कुजवारमूलनक्षत्रयोगे महानवमीति फलातिशयदा भवति तदुक्तम् आश्व
युजमुदिते सूर्ये दिनान्ते नवमी भवेत् कुजमूले भवेद्यत्र पूजनीया प्रयत्नतः इति मदनरत्नवचनात् आश्वि
युक्शुक्लपक्षे याष्टमी मूलेन संयुता सा महानवमी प्रोक्ता त्रैलोक्ये पिदुर्लभेति स्कन्दपुराणे इयमेवानेन्या
काम्या चोक्ता तत्रैव अत्र पुत्रवतोपवासो न कार्यः उपवासं महाष्टम्यां पुत्रवान्न समाचरेदिति मदनरत्ने अत्र
च बलिदानमवश्यमेव कार्यं तदुक्तम् कालीपुराणे तत्राष्टम्यां महापूजां विशेषेण समाचरेत् जागरं च
स्वयं कुर्य्यात् बलिदानं महानिशीति अजाद्यासंभवे कूष्माण्डनारिकेलादीनां बलिदानं कार्यं अत्रैव केषांचि
न्मते हवनं अष्टमे दिवसे होमइति भावे भविष्यात् कार्त्तिककृष्णाष्टमी करकाभिधा सा चन्द्रोदयव्यापिनी ग्राह्या दिनद्वये
यदीव्याप्त्याव्याप्तौ पूर्वा अथ कार्त्तिकशुक्लाष्टमी सा गोपाष्टमी प्रोक्ता अस्यां गोपूजनं कार्यं इयं परा ग्राह्या इयमेव केद

वाष्टमी प्रोक्ता: सा मध्याह्ने संस्थिते रवाविन्दु पक्षम्य तदा ग्रुरूपादान छन्मतः श्रीकालभैरवः अशिराशीनदा
१८ लोकान् भीषयन्नखिलाप्रीति अत्रोपवासः प्रधानं तदुक्तं तत्रैव उपोषणं त्यागभूतमर्घ्यदानमिति स्मृतं तथा जागरणं
रात्रौ पूजायामन्तु रुपे इति दिनद्वये तद्व्याप्तौ पूर्वोक्तं द्वन्द्वेषु सर्वेषु कर्त्तव्या सम्मुखी तिथिरिति ब्रह्मवैवर्तात् पारणं
तु प्रातरेव यदा सन्नयोई गमिन्यां प्रातरेवहि पारणमिति काशीवासनिर्विघ्नार्थं पूर्वोक्तावश्यं इति भैरवाष्टमी अथ पौषशु
क्ला: अष्टम्यां अष्टका श्राद्धं तदुक्तं रघुरान्ववस्थक्यं अत्रापरान्ह व्यापिनी दिन द्वये तथात्वे पूर्वा ग्राह्या अथ पौषशुक्लाष
म्यां बुधयोगे रोहिणी योगे च विप्रभोजन दान होमादिषु महत्फलं इत्युक्तं भविष्ये अथ माघशुक्लाष्टमी सा भीष्मा
ष्टमी तत्र श्राद्धं काम्यं तर्पणं भीष्मायनित्यं तत्रेयं पूर्वान्ह व्यापिनी दिन द्वये न व्याप्तौ परा ग्राह्या अथ फाल्गुन शु
क्लाष्टमी सा तत्र के प्रसिद्धा सा चौदयिकी ग्राह्या: इति निर्णय: दर्पणे अष्टमी व्रतं प्रकरणं अथ नवमी सा पूर्वा ग्रा
ह्या तदुक्तं ब्रह्मवैवर्ते नवमी चाष्टमी विद्धा कर्तव्या फलकांक्षिभिः न कुर्यान्नवमीं तात: दशम्यां तु कदाचनेति वसु
रंध्रयो रितियुग्मवाक्याच्च इति सर्वसाधारण निर्णय अथ सर्वा विशेष नवम्युच्यते तत्र चैत्र शुक्ला नवमी सा राम
नवमी मध्यान्ह व्यापिनी ग्राह्या तदुक्तम् चैत्रे तु रामनवमी पुनर्वसुयुता यदि सैव मध्यान्ह योगे महापुण्यतमा त
भावे दिति दिन द्वये तद्व्याप्तौ तव्याप्तामपि पूर्वां विहाय परैव कार्या नवमी चाष्टमी विद्धा त्याज्या विष्णुपराणे इति अ
गस्त्य संहितायां कार्या नैवाष्टमी युक्ता सन्ततत्रापि वैष्णवा: इति माधव: तेन वैष्णव पदग्रहणात् यदि दशमी श २८

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि. तः त्रिमुहूर्ता द्वितीयदिने तु यवशात् सूर्योदयात् पूर्वमेव समाप्यते । तदाऽष्टमीविद्धैव ग्राह्या एकादशी ।
२९ निमित्तोपवासे नवमी ग्रहणं पारणा त्रैमासिके ... यदाष्टमी शुद्धिः नवम्यास्तथा दशमीवृद्ध्यभावे नवमीव्रत
लोपो मा भूदिति सर्वैरष्टमी विद्धैव नवमी ग्राह्येति ... त्याज्या दिक्षु परा परा । उपोषणं नवम्यां च दशम्यां नैव पार
णमित्यगस्त्यवचनादिति सिद्धान्तः । इयं नित्या काम्या च । अभोजने महान् दोषः ...संहितायामुक्तः इति रामनवमी
... नवमी प्रोक्ताः । अथ सर्वासां मासां श्राद्धार्थं सा पूर्वा पुनः ग्राह्या श्राद्धकालव्यापिनी मुख्या ।
आश्विनशुक्लनवमी महानवमी दुर्गापूजा सु नवम्यां मूलाद्यर्क्षयुता निरुक्ता महती कीर्तिता तस्यां दुर्गामाहिष
दिनीमिति सेयं पूर्वयुता तदुक्तं श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनं च
के अत्र वेधो द्विमुहूर्तात्मको ज्ञेयः पूर्वदिने सायंकाले नवम्या द्विमुहूर्तान्वितत्वे नवमी ग्रहणं परदिने ... पूर्वविद्धा तु न कर्तव्या
नवमीता तद्दशम्यां तु कदाचनेति स्कान्दात् त्रिमुहूर्ततो न्यूनत्वेन परविद्धैव ... इति पूर्ववि
द्धाऽलाभतो नवमीव्रतलोपप्रसंगात् परविद्धायामेवेति दिक् । अत्र देवपूजा होम बलिदानादिकर्म कार्यं अत्र नवम्यां सप
क्रम्य नवम्यामेव समापयेदिति वदन्ति केचित् केचित्तु अष्टम्यां समारभ्य नवम्यां समापयेदिति वदंति तत्र बीजं शि
ष्टाचारः नवम्यां जपहोमं च समाप्य विधिवद्बलिं दद्यादिति राजमार्तण्डात् अत्र बलिदानं अपराह्ने कार्यं न नवमीम
ध्य एव अत्रापराह्निके काले बलिदानं प्रशस्तं दशमी वर्जयेत् अत्र नात्र कार्यो विचारोऽस्ति पूर्वविद्धा त्याज्या ॥ २९

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि. एतन्निमित्तिकं वलिदानमष्टम्यां न कार्य्यं एतद्विषये यामले क्तिरुच्यते सूर्य्योदये परं रिक्तापूर्णा स्यादपरायदि
१० वलिदानं प्रकर्त्तव्यं तत्रोद्देशे शुभावहं वलिदाने कृतेष्टम्यां पुत्रभंगो भवेन्नृपेति तेन कृते पूर्वावल्यादौ प्रेति मदन
रत्ने उक्तम् अयं मुहूर्त्तं निमुहूर्त्तरूप पूर्वविद्धायामपि नवमी मध्ये षष्ठी भद्रात्रावपि वलिदानं कार्य्यमिति प्र
नीयः वलिस्तु देवीपुराणे उक्तः पंचलक्षणोपेतं गंधपुष्पसमन्वितं विधिवत्कालि कालीति जम्बारवड्गेन
घातयेदिति अन्यच्च तस्यां यच्च पशु पुज्यते प्राणिनोऽजादयः शिवे सर्वे ते स्वर्गं नियान्ति घ्नतां पापं न विद्यते
यावन्न चालयेत्प्राणं पशुस्तावन्न हन्यते अशक्तौ अभावे वापि तत्रैवोक्तं कूष्माण्डमिक्षुदण्डं च जम्बीरं नारिकेलकं
एतैर्वलि समाप्रोक्ता तृप्तौ छागसमा स्मृता इति मांसनिवृत्ति परेणापि विप्रेण माषान्नादिभिर्वलिरवश्यं दा
तव्यः तदुक्तं माषान्नेन वलिर्देयो ब्राह्मणेन विजानता इति विशेषणाज्जानता वलिर्विधित्सितो नान्यथाः अत्रा
प्रसादो मार्कण्डेयपुराणे जानता जानता वापि वलिपूजां तथा कृतां प्रतीच्छाम्यहं प्रीत्या इत्युक्तम् अथ
पारणानिर्णयः सा दशम्यां कार्य्या नवमी पर्य्यन्तमुपोष्यत्वात् दत्ते दशम्यां तस्मात्तु अन्यथा नवमीव्रत
लोपप्रसंगात् तदुक्तं यामले आश्विनस्य सिते पक्षे प्रतिपत्प्रभृति क्रमात् नवम्यान्तास्तु नारात्री रूपोष्या स्व
डिका व्रतेति इति धौम्येपि आश्विने मासि शुक्ले तु कर्त्तव्यं नवरात्रिकं प्रतिपदादिक्रमेणैव यावच्च नवमी
भवेत् त्रिरात्रि वापि कर्त्तव्यं सप्तम्यादि यथाक्रममिति अन्यच्च एवं चाविध्यवासिन्यां नवरात्रोपवासतः एक १०

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

भक्तेन नक्तेन तथैवायाचितेन त्रयः किंतु नवमी तिथि नव तिथिपरत्वामि होच्यते तेन तिथि वृद्धौ ह्रासेपि न वनि
वीना सुपोष्यत्वान्न वरात्रत्वहते नवम्यंतास्ता ताः रात्री नवरात्री इति पूर्वोक्तयामलवचनेपि व्याख्यातत्वात्
ननि तुयो मोहाद्दशमीं विधे नवम्यां चंडिकां यजेत् पारणां च प्रकुर्वीत तस्य पुण्यं निरर्थकम् नवम्यां पारितः
देवी कुलवृद्धिं प्रयच्छति दशम्यां पारिता देवी कुलनाशं करोति वै इत्यादीनि बहूनि वचनानि तानि अष्टमी
पर्य्यंतेष्वी व्रतोक्तौ लोहाभिसारिकादौ चरितार्थानि यथा जयाभिलाषी नृपतीः प्रतिपत्प्रभृति क्रमात् लो
हाभिसारिकं कर्म कारयेद्यावदष्टमीति अष्टमी पर्य्यंतमेवोक्ते अत्र नवम्यां पारणायासाध्यत्वात्तत्राकरणे
दशम्यां करणे दोषोपि भवत्येव अत्र तु नवत्ति व्युपवासोक्तौ नवम्युपवासस्य हानित्वापत्तेः अद्यारभ्य नवमी
पर्य्यंतं नवरात्रिव्रतमहं करिष्ये इत्यादिकं संकल्पस्य विकल्पत्वापत्तेः एतद्विषय प्रयुक्त वचनां निरर्थक
त्वापत्तश्च नवरात्रिव्रते नवम्यां पारणाया असाध्यत्वादोषश्रुतिरपि न बाधिकाय याप्यरे ग्रंथलाभे पूर्वविद्धा
महाष्टमी व्रतवत तेन नवरात्रे व्रते दशम्यां एव पारणमिति दिक् हेमाद्रौ निर्णयसिंधावप्येवं सिद्धांतः पारणा
दि सूतक प्राप्तौ सूतकेपि पारणा कार्य्या तदुक्तं व्रतयज्ञ विवाहेषु श्राद्धे होमार्चने जपे प्रारब्धे सूतकं न स्यादना
रब्धे तु सूतकमिति प्रारंभस्तु तत्रैवोक्तः प्रारंभो वरणं यज्ञे संकल्पो व्रत सत्रयोः नांदीमुखं विवाहादौ श्राद्धे पाक
परिक्रियेति विप्रभोजनं तु सूतकांते इति रुद्रयामलोक्तं एवं स्त्रीभिरपि रजोदर्शनम् कर्तव्यमेवेत दुक्तं सत्यव्र ३१

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰ तेन प्राब्दं दीर्घे तपसा नारीणां यद्रजो भवेत् तत्रापि व्रतस्यास्याद पराधः कथंचन इति सधवा विधवानां
३२ सर्वसामान्यपक्षे पं इति महानवमी निर्णयः इयमेव मन्वादिः अथ कार्तिक शुक्ल नवमी कूष्माण्ड नवमी सो
दयव्यापिनी ग्राह्या तत्र सुवर्णं कूष्मांडदानं महत्फलं ददाति इयमेव युगादि अस्यामेव विष्णुं त्रिरात्रिव्रतं
कृत्वा तुलसी विवाह कार्य्यः अथ मार्गशीर्ष शुक्ल नवमी सा द्यकल्पादि सा पूर्वा पौष कृष्णा नवमी सावि
त्र कल्पादि सापि पूर्वा फाल्गुण शुक्ल नवमी नक्तसंज्ञा सा स्वातनदा नादावति प्रशस्तोदयगा ह्य इति निर्ण
यदर्पणे नवमी प्रकरणम् ॥ ९ ॥ अथ दशमी सा पूर्वा परा वा उपवासे तु पूर्वैव सा कृष्णा पूर्वा शुक्लोत्तरा
अथोच्यते संपूर्णा दशमी कार्य्या परा पूर्वं सा थवा युक्ता न दूषिता यस्मादिति सा सर्वतो मुखेति विकल्प
उक्तः तेन व्यवस्था जाता तस्मा द्व्यवस्था क्रियते शुक्लपक्षे तिथिर्ग्राह्या यस्यामस्त मितो रविरिति माधवेपि कृ
ष्णा पूर्वोत्तरा शुक्ला दशमेवं व्यवस्थितेति उपवासे तु कृष्णा शुक्लायो पूर्वैव तदुक्तम् नागविद्धा तु या षष्ठी इ शि
व ८ विद्धा तु सप्तमी दशम्येकादशी विद्धा नोपोष्या सा कपं चमेति आपस्तंबोपि दशमीं चैव कर्तव्या सद्
र्गा द्विज सत्तमेति इति सर्वसाधारण निर्णयः अथ विशेष दशम्युच्यते अथ पस्या कस्यां चिच्छुक्ल
दशम्यां मासा दशमी व्रत मुक्तम् भविष्योत्तरे इयं काम्या सा परा कार्य्या ॥ अथ ज्येष्ठ शुक्ल दश
मी दशहराख्या सायो गाधिक्या पूर्व परा वा ग्राह्या तत्र मलमासे सति मलमासे न कुर्य्यादिति उक्तं ३२

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि· चद्दशहरा सुनोत्कर्षं इति हेमाद्रौ ब्रह्मसंयोक्तेः अन्यत्रापि योगाधिक्याद्दशहरा ग्राह्याः पूर्वापरापिवा
३२ मलमासि मले कुर्य्यादिच्छुः इनो वहुसम्मत मित्युक्तत्वात् दशयोस्तु ज्येष्ठमासि सिते पक्षे दशम्यां बुध
हस्तयोः गरानंदे व्यतिपाते कन्याचंद्रे वृषे रवौ दशयोगे नरः स्नात्वा दशपापैः प्रमुच्यते अथ दशपापानि
शेषः परद्रव्येष्वभिध्यानं मनसाविष्टचिंतनं वितथाभिनिविशश्च पापं स्यात् चतुर्विधम् अदत्तानामु
पादानं हिंसाचैव विधानतः परदारोपसेवा च कायिकं त्रिविधं स्मृतं अथ दशपापानि हरतीति तेन दश
हरे व्याख्या अत्र भौमयोगे पि बुधवा वहुधा फलमुक्तम् तदुक्तं दशमी शुक्लपक्षे तु ज्येष्ठमासि कुजे दिनेः
अवतीर्णा यतः स्वर्गाद्धस्तर्क्षे तु सरिद्वरा तेन वाराहात् दशहरा आषाढशुक्लदशमी मन्वादिः अथ भाद्र
शुक्ल दशम्यां दशावतार व्रतमुक्तम् भविष्ये तत्रैयं परविद्धा अथाश्विनि शुक्लदशमी विज
यादशमी सापरदिने अपरान्हे श्रवणयोगाभावे पूर्वाग्राह्याः तदुक्तम् नवमीशेष युक्तायां दश
म्यामपराजिता ददाति विजयं देवी पूजिता जय वर्द्धिनी ति स्कांदोक्तेः एकादश्यां न कुर्वीत पूजनं
चापराजिता मिति निषेधाच्च यदा पूर्व दिने ऽपरान्हे श्रवणायोगस्तदा त्यापि दशमी परैव कार्य्या
तदुक्तं हेमाद्रौ उदये दशमी किंचित संपूर्णैकादशी यदि श्रवणार्क्षे यदाकाले सा तिथिर्विजया
भिधा श्रवणार्क्षेन्तु पूर्णाषांका क्रान्त्यः प्रसिस्थापतः १ ॥ २ ॥ २ ॥ २ ॥ २ ॥ २ ॥ २ ॥ ३२

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि.

३४ उल्लंघयेयुः सीमानं तद्दिनर्क्षेऽतती नरा इति काले अपरान्हे इत्यर्थः तेन परदिने ऽपरान्हे श्रवणाभावे पूर्वैवश्र
स्या अपरान्हो मुख्य कर्म कालः प्रदोषे गौणः तदुच्यते दशम्यां तुनरैः सम्यक पूजनीयापराजिता एशानीं दिशि
माश्रित्य अपरान्हे प्रयत्नतः इति मुख्यत्व मत्रैव पूजा उक्ते गौणस्तु आश्विनस्य सिते पक्षे दशम्यां तारकोदये
स कालो विजयोज्ञेयः सर्व कार्य्यार्थ सिद्धिदः इत्यादिनोक्तः तेन दिन द्वये ऽपरान्ह व्याप्तौ पूर्वा गौण कालेपि स
त्वात् दिन द्वये प्रदोष व्याप्तौ परा मुख्य कालसत्वात् दिन द्वये अपरान्हस्पर्शे परदिने अपरान्हे श्रवणयोगश्चे
त्तदा परा ऽन्यथा पूर्वा गौण काले लाभादिति सिद्धांतः केचित्तु ईशस्य दशमी मुलां पूर्वविद्धां न कार्ये श्रवणे
नापि संयुक्तां राज्ञा यदाभिषेचने इति तच्चिंत्यं अस्य राज्ञा यदाभिषेक महोत्सव विषयस्य पृथक्त्वे उक्तत्वात् न
तु विजया पूजन विषयत्वे मिति ज्ञेयं तत्र विजया सूर्योदये यदा राजन् दृश्यते दशमी तिथि आश्विनस्य सिते
पक्षे दशम्यां सर्व राशिषु सायंकालेषु भायात्रादिवा विजियत्नणे इति निर्णय सिंधे पि उक्तं अत्र खंजन दर्श
नं कार्य्यं तेन विशेष स विशेष स्थानादौ दर्शनेन संवत्सर पर्य्यंतं फलं ज्ञायते तदुक्तं वसंत राजेन कृत्यं ब्राह्म
ण कार्य्य सिद्धिः तुलाप्रके हुताशे भयं याम्ये रोग भयं सुरारि कलहं लक्ष्मी समुद्रालये वायव्ये वर वस्त्र या
न भूषणं दिव्यांगना चोत्तरे ईशाने मरणं ध्रुवं निगदितं दिग दर्शनं खंजन १ अप्रां समीपे गजमस्तके वा सूर्यो
दये ब्राह्मण सन्निधौ च आकाशदेशे गहने वनेवा धन्यो नरः पश्यति खंजरीटं अन्येपि केचित्तु नील कंठ ३४

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि. त्याज्या तदुक्तं विधवापावनस्यश्च यतेश्चैकादशी द्वये उपवासो गृहस्थस्य शुक्लायामेव पुत्रिणः इत्या
३६ दिवचनानि निर्मूलानि इति उपवासनिषेधात्तु भक्तं किंचित्प्रकल्पयेत् तदुष्यन्त्युपवासेन उपवास
फलं लभेदित्युक्त्वा तत्रैवोक्तं नक्तं हविष्यान्नमनोदनं च फलं तिलादीरमथोंबु चाज्यं यत्पंचगव्यं यदि
वापि वायुः प्रशस्तमत्रोत्तरमुत्तरं चेति इति तु स्मार्तविषयं वैष्णवैः नतु सर्वाश्चैय्येकादश्य उपोष्याः
सपुत्रश्च सभार्यश्च वैष्णवो भक्तिसंयुतः एकादश्यामुपवसेत्पक्षयोरुभयोरपि इति नारदोक्तेः काम्य
व्रते तु सर्वैरपि कृष्णा शुक्ला चोपोषणीयाथ यत्तु तदुक्तं विष्णुपुराणे युधिष्ठिर उवाच श्रुतानि बहु
धर्माणि व्रतानि च जगत्प्रभो एकादशीसमं किंचिच्छ्रुतं नैव जनार्दन पुनस्त्वेकादशी ब्रूहि पापघ्नीं
पुण्यदायिनीं यां कृत्वा मनुजा लोके प्राप्नोति परमं पदम् श्रीकृष्ण उवाच शुक्ले वाथ दिवा कृष्णे
यदा चैकादशी भवेत् तत्याज्या चैव राजेंद्र मोक्षसौख्यविवर्द्धनी एकादशी कलौ राजन् भवबंध वि
मोचनी कामिन्यां सर्वकामानां पापानां पापहा शुचिरविवारेथ मांगल्ये संक्रांतौ वा नृपोत्तम एका
दशी सदा पोष्या पुत्रपौत्रविवर्द्धनी इति विष्णुपुराणोक्तेः यत्तु विष्णुः पत्यौ जीवति नारी उपोष्य तं चरेदिति न
तन्निःसारहितव्रतविषयं अतः कात्यायनेनोक्तं भार्या पत्युमतेनैव व्रतादीनां चरेत्सदा अत्र शोदमो वेधो निषेधः अरु
णोदयवेधः निशीथोदयवेधश्चेति तत्र वैष्णवेना रुणोदयवेधस्त्याज्यः तदुक्तं गारुडे दशमी ॥ ॥ ॥ ३६

CC-0 Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि· दर्शनमात्रं तद्दत्तराजे स्पर्शकनम् ॥ अत्रैव नवदुर्गा विसर्जनं पारणं च कार्य्यं तदुक्तम् दुर्गाभक्तितरंगिण्यां
३५ देवीपुराणात् ततः प्रातः पूजयित्वा दशम्यां विधिपूर्वकं संप्रेषणं तु कर्तव्यम् गीतवादित्रनिस्वनैरिति ॥ इति
विजयदशमी ॥ अथ पौषशुक्लदशमी ईशानकल्पादिः माघशुक्लदशमी घोरकल्पादि इति निर्णयदर्प्प
णे दशमी प्रकरणं १० अथ एकादशी यद्यप्यष्टाब्दोर्ध्वे लुन्युक्तैकादशीजनाः कुर्वन्त्येव तथापीह मुख्य-
साप भयोच्यते १ अत्र दशमीवेधवर्जितैकादशी सर्वेषां नित्या तदुक्तं धर्मप्रदीपे भविष्यात् मोहादपि नरः
कश्चित्त्यजेदेकादशीव्रतं कृत्वा कृच्छ्रशतं पापात्मुक्तो भवति नान्यथेति अन्यच्च व्रताऽकरणे प्रायश्चित्तमह
माधवीये कात्यायनः अर्के पर्वद्वये रात्रौ चतुर्दश्यष्टमी दिवा एकादश्यां महोरात्रं भुक्त्वा चान्द्रायणं चरेदिति यानि
कानि च पापानि ब्रह्महत्यासमानि च अन्नमाश्रित्य तिष्ठन्ति संप्राप्ते हरिवासरे पक्षेपक्षे च कर्तव्यम् एका
दश्यामुपोषणं इति नारदोक्तेः यदिच्छेत् हरिसान्निध्यं श्रियं संततिरेव च एकादशीमुपोष्येत पक्षयोरुभ
योरपि इति व्यासः वरं स्वमातृगमनं वरं गोमांसभोजनं वरं हत्या सुरापानं नैकादश्यां तु भोजनं इति नारदीयो
दशमीवेधवर्जनमपि तत्रैवोक्तं लववेधेऽपि विप्रेंद्र दशम्यैकादशीं त्यजेत् सुरया बिंदुना स्पृष्टं गंगांभ इव निर्म
लं इति नारदीयात् अत्र गृहिणः शुक्लायामेव व्रतं न तु कृष्णायां तदुक्तम् शयनी बोधिनी मध्ये या कृष्णैका
दशी भवेत् सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचन इति पाद्मात् तत्रापि पुत्रवतां तु सर्वाः विशेषतः कृष्णा ३५

CC-0 Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰ द्वांतगते नचाः पाने वरं स्वमातृगमनं वरं गोमांसभोजनं इत्यादि वचनान्महापातकं स्यादित्यादिशास्त्रे ए
४० कर्तव्य मिति शाकाहारमुक्तं ॥ वास्तुकं शाकं कंदं च सुंठीमरिच धान्यकं यवानी सालिकं पिंडान्नं मेह
फलसकूटकामिति अन्योपि दुग्धसंका शर्पि षाते मृचं मिश्रींच सैंधवं सत्फलं शृंगाटप्रसमकं नक्के
फाफरसंयुतं इति अन्येपि नक्तं हविष्यान्नमनौदनं वा फलेतिलाः क्षीरमथांवुचाज्यं यत्पंचगव्यं यदि वा
पिवायुः प्रशस्तमत्रोत्तर मुत्तरं चेति नक्तक्तम् एकादश्यां तु आन्नायां मातापित्रो मृतहनि द्वादश्यां तन्न
दातव्यं नोपवासे दिनं कचिदिति पाद्मोत्तरखंडे तत्र विशेष मुक्तं ॥ व्रतस्थै वर्ते ये कुर्वंति महीपालश्रा
द्धं त्वेकादशी दिने अयतस्ते नरकं यांति दाता भोक्ता परेतकः पाद्मे पुष्करखंडे एकादशी यदा राम
श्राद्धं नैमित्तिकं भवेत् तद्दिनं तु परित्यज्य द्वादश्यां श्राद्धमाचरेत् स्कांदे अनर्पितान्नं ना अनिपितर
सदिवौकसः सूतकेषु समरतेषु नत्याज्यं द्वादशी व्रतमिति श्रवणे पारणं कदापि न कार्यं तदुक्तं प्रपो
कादशी माहात्म्ये पारणं श्रवणे यादि करोति हंति तत्पुण्यं द्वादश द्वादशीभव मितितेन यावत् श्रवणे योगस्ते तावद
न्नमुपोषये दिनिदानानि तु सूतकान्ते कार्याणि रजोदर्शने कार्यम् एकादश्यां न भुंजीत नारी दृष्टरजस्यपीति गुरु
स्मृतेः मोहादेकादशीभंगे द्वादश्यां व्रतमाचरेत् द्वादशी प्रथमतः पादो हरिवासर संज्ञितं तमतिक्रम्य विप्रेंद्र पारयेत्
खहेतवे इति सर्वसामान्यनिर्णय उक्तः अथ विशेषैकादशी उच्यते तत्र शुक्लैकादशी विसे दोलोत्सवः कार्यः ज्येष्ठ ४०

नि. कुर्यांयोमन्यंतेसवैष्णवः इतितत्रैवोक्तं माधवस्तुवैखानसागमोक्तदीक्षां प्राप्तोहि वैष्णवइत्याह अत्र वैष्णवे
३८ नैकादश्येवशुद्धासती वर्द्धते द्वादशीचोभयंवातदापराकार्य्या तदुक्तं माधवेन एकादशी द्वादशीवाधिका चे
त्पर्यंतंदिनं पूर्वंग्राह्यं नोत्तरमित्यादि इतिवैष्णवनिर्णयः अथस्मार्त्तानांतु एकादश्यशुद्धासती द्वादश्यपिवर्द्धते तदस्मा
र्त्तैः पराकार्य्या तदुक्तं एकादशी द्वादशीचेत्युभयंवर्द्धते यदापूर्वं दिनंत्याज्यं स्मार्त्तैर्ग्राह्यं परंदिनमितिमा
धवेन यदैकादशी शुद्धासती वर्द्धते द्वादशी समान्यूना वातदा गृहस्थैः पूर्वा यतिभिरुत्तरा कार्य्या उभय
वृद्धौतु सर्वेषां परैव द्वादशीमात्रवृद्धौतु शुद्धैकादशीचेत् पूर्वा अन्यथा परा किंचिद्विशेषमाह दशम्याभि
ता पूर्वा लुप्ता एकादशी परा उपोष्या गतगुणा प्रायः त्रयोदश्यांतु पारणं पर्वां चेत्तज्जये पूर्वैर्घदुर्गानिक १०
क्षये शुद्धाप्येकादशी त्याज्या द्वादशीसमुपोषयेत् इतिविष्णुस्मृतिः दिवारात्रिविचारेण ह्रस्वदीर्घविधान
तः दशम्येकादशीवेधो विचार्य व्रतमाचरेदिति बहुवाक्यविरोधेन संदेहोजायते यदा द्वादशीतु तदा ग्राह्या त्र
योदश्यांतु पारणम् इतिमार्कण्डेयः अथैकादशी श्राद्धप्राप्ते वपित्र्यसेवितं पितॄणां घ्राणमुक्तम् तत्रविशे
षमाह कात्यायनेन इदं सूतकेपिकार्य्यं सूतकेमृतके वापितथा नत्याज्यं द्वादशीव्रतम् इति उपोषणे
क्षिपरेणसति श्राद्धं कृत्वातुयोविप्रो नभुंक्ते पितृसेवितं हविर्देवास्तदंतानि कव्यानि पितरस्तथा अत्र केन स
निमित्तेव भोजनेन तु नारदः श्राद्धलोपकृतस्तेनमात्र द्वापित्रहा भवेत् इति वचनात् श्राद्धलोपः स्याच्छ्र श्र

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि. वेधः दशमीशेषसंयुक्तः यदि स्यादरुणोदये नैवोपोष्यं वैष्णवेन नहि नैकादशी व्रतं इति न हि नेत्यक्त्वा
२२ तत्पर दिने व्रतकार्थमित्यर्थः तदुक्तं तत्रैव यद्यरुणोदये दशमीसंस्पर्शैकादशी ततो नोपोषणीया स्यात्
पीपोषिता चेद्यथः प्रदेति मार्कंडेयवं तत्र वैष्णवेनारुणोदय वेध त्याज्य इत्यादि दर्शकम् तत्र वैष्णवानां वेध
विशेष माह दशमीवेधजालेन मोहितं सकलं जगत् आसुरं भावमापन्नं संसारं संसरंतीति इति हरिवा
सरप्रदीपे मार्कंडेयः अन्यच्च लवनेधेपि विप्रेंद्रेति सर्वमुक्तम् नारदीयादित्यादि वचने न विशेष मुक्तम्
पंचचत्वारिंश घटी दशमी यदि दृश्यते एकादशी तदा पोष्या नात्र कार्या विचारणा इति विष्णुरहस्ये न
वमी पलमेकं तु दशमी वृद्धिगामिनी तदा से कादशीं त्यक्त्वा द्वादशीं समुपोषयेदिति आचारतिलके वैष्ण
वा धर्मपरा लक्ष्मा नारायणपरायणाः समं विचार्य कुर्वंति कारयंती नरान्वतं इति विष्णुस्मृतिः अर्द्धरात्रिमति
क्रम्य दशमी यदि दृश्यते तदा त्वेकादशीं त्यक्त्वा द्वादशीं समुपोषयेदिति विष्णुरहस्ये मंदाकिन्युवाच की
दृशीं त्रिस्पृशा देवता समावद माधव कीदृशी महिमा तस्या स्वयोक्ता या मया धुना दशम्येकादशी भद्रा जा
यते यत्र मिश्रिता त्रिस्पृशाख्या भवेदेव अन्यथा वापि तद्वद प्राची माधव उवाच आसुरी त्रिस्पृशा देवी
वर्जनीया प्रकीर्तिता वर्जनीया प्रयत्नेन यथा नारी रजस्वला मल्लशार पिहीनानां त्रिस्पृशापतु जा
न्हवी एकादशी द्वादशी च रात्रिशेषे ॥ + ॥ + ॥ + ॥ + ॥ + ॥ + ॥ + ॥ + २

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ति॰ त्रयोदशी त्रिस्पृशाख्याता विज्ञेया दशमीसंयुता नहि आद्यो नंदा जयाचांते मध्ये प्रतिष्ठिता त्रिस्पृशा सा तु वि-
३८ ज्ञेया महापातकनाशिनी कर्तव्या सा प्रयत्नेन यज्ञकोटिफलप्रदा एकादशीमेगात्राणि द्वादशी च मुखं म-
ति नः त्रयोदश्यां त्रयस्यास्थानेस्पृशा सा प्रकीर्तिता इति स्कंदपुराणे अथ व्रतेतिथिच्छेदे तु सत्यपि द्वादशी समु-
पोषयेत् पारणं तु त्रयोदश्यां यदिच्छेच्छुभमात्मनः जपहोमे तथा दाने ब्राह्मणानां च तर्प्यणे पारणे चापि स-
र्वेषु प्रशस्ताच्च त्रयोदशी इति एकादश्यां तु द्वायां नोपवासाच्च नाधिकं द्वादश्यमेव तु कुर्यात् त्रयोदश्यां तु पार-
णमिति स्कांदे च अर्द्धरात्रिमतिक्रम्य दशमी यदि दृश्यते कपालवेधमित्याहुराचार्य्या ये हरिप्रिया
अर्द्धरात्रिपर्यंतं दशमी दृश्यते यत्र तु एकादशी तदा पोष्या नात्र कार्या विचारणा अर्द्धरात्रिमतिक्रम्य दशमी
यदि दृश्यते ह्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेत् न गर्भे वसते जंतुरिति आह पराशरः चक्रवर्तित्वमतु-
लं संप्राप्तमचलां श्रियं चतुर्दशैते संप्राप्ता बलिनश्चक्रवर्तिनः कुवलाश्वो अश्वगाधिः हरिश्चंद्रो नलो मनुः
मरुत्तो भरतश्चैव कृतवीर्यस्तु हैहयः मांधाता सगरो रामः काकुत्स्थो नहुषस्तथा उपोष्य द्वादशीं शुद्धामपरां च
विवर्जयेत् भुक्त्वा स्वर्गसुखान्येते चक्रवर्तित्वमागता इति हरिवासरप्रदीपे द्वादशी प्रथमः पादो हरिवासर
संज्ञितं इति यत्तु विष्णुः पत्यौ जीवति या नारी उपोष्य व्रतं चरेदिति तद्भर्तृत्रा रहितविषयं वैष्णवलक्षणं ३८
भविष्ये शोकमोनिवृत्तस्य विष्णुमंत्ररतस्य च वैष्णवत्वं परं प्रेवं दृढभक्तिस्य शार्ङ्गिनः इति यथा भुक्तातथा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि.
४२

क्लैकादश्यां निर्जलमुपोषणं आषाढशुक्लैकादशी हरिशयनी तत्र शेषशयनस्थितं लक्ष्मीसेवितं विष्णुं पूजयेत्
मलेतु न सुप्तो विष्णुः शयनं कार्य्यं कालादर्शोक्तवचनात् अत्रैव चातुर्मास्यव्रतादिनियमारंभ एका
दश्यां तुरन्द्वीयासंक्रांतौ कर्कटस्य वा आषाढ्यां वा नरः कुर्याच्चातुर्मास्योदितं व्रतं अत्र ग्रहणं नियमादि
नां शाकादौ च वर्जनं दानं वस्त्रादिद्रव्याणां ह्रस्विकानां च लेखनमिति: अस्यारंभस्तु शुक्रास्तादौ वर्ज्यं
यत्तु नशेर्शयनं मौञ्जिचभुक्ता ग्रवीन वा नियै; एवं त्वं चिंतयेदादौ चातुर्मास्यस्य विधान्तरः इति द्वितीया
दिविषयं असौच मध्ये पि द्वितीया घारंभो भवत्येव इदं प्रथमारंभे मलमासेन कार्य्यं द्वितीयारंभे तु भवत्येव
अत्रैव गोपाद्मव्रतं तच्छयनी पर्य्यंतं कार्य्यं भाद्रशुक्लैकादश्यां वामनावतारः भविष्योत्तरे आश्विनशुक्लैकादश्यां
कार्त्तिकस्नानारंभः तुलामकरमेषेषु प्रातः स्नायी सदा भवेदिति विष्णूक्तेः कार्तिकशुक्लैकादशी हरिबोधनी तत्र सुप्तं
हरिं बोधयेत् पुनः अत्र इक्षुसंलिरिवस्य पूजयेत् अत्र कुंभदानं महत्फलं उक्तं अत्रैव भीष्मपंचकव्रतारंभः इयमेव योगव
लात्मंतारव्यात् दुक्तं एकादशी सोमयुक्ता कार्त्तिके मासि भामिनी उत्तराषाढसंयोगाद्दंतमासा प्रकीर्त्तिता तस्यां य
त्क्रीयते भद्रे सर्वं मानन्त्यकं भवेदिति नारदीयात् मार्गशीर्षकृष्णैकादशी वैतरणीव्रतं अत्र गोपूजादानं च मुख्यमुक्तं
व्रतार्के पौषशुक्लैकादशी मन्वादि माघशुक्लैकादशी भीमद्वादशीसंज्ञा फाल्गुणकृष्णैकादशी वाराहकल्पादिरि
ति निर्णयदर्पणे एकादशीप्रकरणं अथ द्वादशी सा सर्वमते पूर्वा युग्मवाक्यात् स्कांदेपि चैत्रशुक्लद्वादश्यां दमनोत्स ४२

...धणां वादितः इति अथ सर्वासु त्रयोदश्यां...

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰ वः नत्रैकादश्यां सायं दमनकं विन्ताप्याधिवासनं कृत्वा द्वादश्यां पूजयेत् पारणा हे द्वादश्य ऽलाभेन्त्रयोदश्या
५२ मेव कार्य्यं कालांतरमस्योक्तम् माधवे दमनारोपः स्यान्मधौ विघ्नतो न चेत् वैशाखे श्रावणे मार्गे कर्त्तव्यं
दमनार्प्पणमिति नागेनागपंचम्यां इदं शुक्ल गुर्वो मौढ्योपि कार्य्यं इदं मलेन कार्य्यं शुद्धे मासि कार्य्यं इदं
नित्यं उर्ज्जे व्रतं मधौ दौ ला श्रावणे ननु पूजनं चैत्रे च दमनापमकुर्वाणो व्रजत्यधः इति पा [illegible]
दत्तावलं तु विशेषतः उक्तं रामार्चनचंद्रिकायां विस्तारः अथाशोकशाखाया मध्यमरुवकपालीशाखया पूज
नं इति दमनारोपः वैशाख शुक्ल द्वादश्यां योगविशेषे माद्रिः पंचाननस्थौ गुरुभूमिपुत्रौ मेषे रविः स्याद्य
दि शुक्लपक्षे पाशाविधानाकरहस्तेन भेन युक्तातिथिर्व्यतीपात इति ह योगः अस्मिन्युगे [illegible] दाने
न सर्वं परिहाय पापं सुरत्वमिंद्रत्वमनामयत्वं मर्त्याधिपत्यं लभते मनुष्यः इति आद्र शुक्ल द्वादश्यामनु
राधारहितायां पारणं आभाकार्त्तिक पक्षेषु मैत्रश्रवणरेवती संगमे न हि भोक्तव्यं द्वादश्यां हरेर्दिने इति
आषाढमाभाद्रपदकार्त्तिकेषु एतेषां शुक्लपक्षे क्रमेणानुराधाश्रवणरेवतीषु पारणं न कुर्यात् इत्यर्थः
अथात्र विशेषो विष्णुधर्मे मैत्राद्यपादे स्वपिती हविष्णो योगान्त्यपादे प्रतिमाधमैति श्रुतेश्च मध्ये परिवर्त्त
नेति मदुत्थाने च शयने मन्यार्थे परिवर्त्तनेति अर्थयोदीहितः कश्चिद्वैष्णवो भक्तितत्परः अन्नं कार्यादेशुजी
तपलमूलमथापि वा अपराधसहस्रेण न त्वं मापि कदाचन स्नामामि नरके घोरे यावदाहूतसंप्लवम् ५२

CC-0 Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि. पूर्वा कृष्णा परा ग्राह्या अत्र विशेषः गजच्छायायोगः कृष्णपक्षे त्रयोदश्यां मघासु इन्दुकरं रविः यदा तदा ग
४६ च्छाया श्राद्धे पुण्ये खाप्याते अथ कार्त्तिकस्य त्रयोदश्यां प्रदोषे यमदीपकं दानं तस्य प्रवक्ष्यामि अप
मृत्यु विनाशनं प्रदोषसमये कार्य्यं त्रयोदश्यां निशामुखे दीपदानमंत्र मृत्युना पाशदंडाभ्यां कालेन
स्यामयासह त्रयोदश्याम् दीपदानात् सूर्य्यजः प्रीयतामिति स्यामयासह यमायनमः अत्र प्रदोषव्यापिनी
दिनद्वये तत्तद्व्याप्तौ परा इति तिथि निर्णय दर्प्पणे त्रयोदशी प्रकरणम् १२ अथ चतुर्दशी सा कृष्णा पूर्वा
शुक्लोत्तरा ग्राह्या तदुक्तं नारदीये तृतीयैकादशी षष्ठी शुक्लपक्षे चतुर्दशी पूर्वविद्धा न कर्त्तव्या परसंयुतेति
कृष्णे त्वापस्तंबः कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी पूर्वविद्धानुकर्त्तव्या परविद्धा न कुत्रचित् इति सा
मान्यनिर्णयः अथ विशेषः शिवव्रते तु द्वाविंब प्रदोषिणी शीथोभयव्यापिनी ग्राह्या दिनद्वये प्रदोषभा
व्याप्त्यभावे पूर्वा दिनद्वये निशीथव्याप्त्यभावे परा इति अथ चैत्र चतुर्दश्यां तं चैत्र कृष्णचतुर्दश्यां पस्नात्वा
प्रतरां हरिं गंगायांच विशेषेण न सप्रतो भविष्यति अत्र पूर्व कृष्णपक्षस्यत्वात् अत्रैव भौमयोगश्चेन्महापु
ण्यमुक्तं चैत्र शुक्ल चतुर्दश्यां दमनकारोपणं तत्र रात्रि योगिण्यां कार्य्यं नाथवे युक्तम् शुक्लापि एविषु
कास्या चैत्र श्रावणमासयोः इति वैशाख शुक्ल चतुर्दश्याम् श्रीनृसिंहजयंति इति तदुक्तं वैशाखशुक्लपक्षे ४६
तु चतुर्दश्यां हरिर्भवेत् मज्जन्मसंभवं पुण्यं व्रतं पापप्रणाशनं पतानपूर्व विद्धा शुद्धा मज्जन्म कारणं तथ्या

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि. त्रयोदश्यां निराहारो भवेद्दिवा घटीत्रयादस्तमयात्पूर्वं स्नानं समाचरेत् शुक्लाम्बरधरो भूत्वा वाग्यतो नि
४५ यमान्वितः कृतसंध्याजपविधिः शिवपूजां समाचरेत् अत्र प्रदोषव्यापिनी ग्राह्या त्रिमुहूर्ते प्रदोषः स्याद्रवा
वस्तंगते सतीति मदनरत्ने दिनद्वये तद्व्याप्तौ पूर्वा अव्याप्तौ परा वैषम्ये ह्यधिकं शगा ग्राह्या इयं दिनद्वये
प्रदोषगापि शनिवारयोगश्चेत्तद्योगिनी ग्राह्या तदुक्तं तत्रैव शनिवारे प्रदोषो यद्दुर्लभः सर्वदेहिनां तत्रा
पि दुर्लभं मन्ये कृष्णपक्षे समागतः तत्रैव शिवपूजनं नृणां चतुर्वर्गफलप्रदमिति इति सामान्यनिर्णयः अ
थ विशेषतः अथ चैत्रकृष्णत्रयोदश्यां योगविशेषे वारुणी पर्व तदुक्तं वारुणेन समायुक्ता मधौ कृष्णत्र
योदशी गंगायां यदि लभ्येत सूर्यग्रहशतैः समा शनिवारसमायुक्ता सा महावारुणी स्मृता शुभयोग
समायुक्ता शनौ शतभिषा यदि महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् इति स्कांदात् अत्र चैत्रः पौर्णि
मांतमासे तद्ग्राह्यः चैत्रशुक्लत्रयोदश्यामनंगव्रतं तत्र पूर्वविद्धा त्रयोदशी तिथिः कामस्य कृष्णाष्टमीत्ये
ता पूर्वे पुनरिदं मंदा तिथिः पूर्वा दीपिकायां वैशाखकृष्णत्रयोदशी गौरीकल्यादि आषाढशुक्लत्रयोदश्यां
जयापार्वतीव्रतं इयमपि पूर्वा अथ भाद्रशुक्लत्रयोदश्यां गोत्रिरात्रिव्रतम् इदं कामधेनोर्व्रतं अत्रापि
पूर्वविद्धा बधस्तु त्रिमुहूर्तात्मकः पूर्वोक्तः एवं स्कांदेऽपि आश्विनि शुक्लत्रयोदश्यां गोरात्रिव्रतमुक्तमेतत्
गुर्जरदेशेषु प्रसिद्धमेव अथाशोकव्रतं त्रिरात्रेव भविष्योत्तरे अत्र रात्रिव्यापिनी दिनद्वये तथात्वे मुक्ता ४५

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰ यदिचेद्वर्जे तद्गोमूत्रप्राशनं सप्तदिनावधि रिति नैत्रबोक्तम् क्षीरशाणानि भक्ष्याणि इकारासने र्बुधः सप्तरात्रं
४४ व्रतं कुर्य्यात् प्रयत्नेन तस्माद्धितं इति व्रतं गोमूत्र यावकं तस्मात्यायस्तादि दुग्धरणी पलंभक्त र्जन मितिवा
वाच्य दुग्धयाश्व पूजेमासीति पञ्चकें संख वचनं निर्णयसिंधे इतिवामन द्वादशी॥ अथ कार्तिक कृष्ण द्वा
दश्यां गोवत्स द्वादशी व्रतं दृष्टं प्रदोष व्यापिनी कार्य्या दिन द्वये तथा पूर्वा तदुक्तं वत्सपूजा वटश्चैव कर्तव्या प्रथमे
दिने निर्णया मृतात् एतद्दिने गोक्षीरं विकाराणि च वर्जयेत् अत्रज्योति निर्बंधे नारदः आश्विने कृष्णपक्षे
तु द्वादश्यादिषु पंचसु तिथीषूक्तः पूर्वे रात्रे नृणां नीराजना विधिः नीराजयेयुः देवांस्तु विप्रान्गाश्च तुरंगमा मि
ति अत्रामांत मासेनाश्विनोग्राह्यः कार्तिक शुक्ल द्वादशी मन्वादि अथ पौष कृष्ण द्वादश्यां सुरूपा द्वादशी व्र
तं गुर्जरेषु प्रसिद्धं इयमपि पूर्वैव माघ कृष्ण द्वादश्यां तिलद्वादशी व्रतम् अत्रस्नान दानादि पाद्मपस्ति तप्रकार
स्त्वेवोक्तं माघ शुक्ल द्वादशी भीष्मद्वादशी इयमपि पूर्वा पैवोक्ता निर्णयामृत् फाल्गुन शुक्ल द्वादशी योग विशेषं
तु गोविंदे निरूप्या तानदुक्तं फाल्गुनामलपक्षस्य पुष्यर्क्ष द्वादशी पुना गोविंद द्वादशी नाम महापातक
नाशिनी अस्यां गोविंद पूजोपवास व्रतादिकं कार्य्यं इयमेव सारस्वत कल्यादि इति मिथि निर्णयदर्प्पणे द्वादशी
व्रतं १२ अथ त्रयोदशी सा शुक्ला पूर्वा कृष्णा परा ग्राह्या तदुक्तं दीपिकायां त्रयोदशी तिथिः पूर्वासिते तथासिते
पश्चादत्र परत्रचेत्तत्सभवेन्प्राग्विधएवोदितः इति अथ सर्वासु त्रयोदशीषु प्रदोषे शिवपूजनं काम्यं पक्षद्वये ४५

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

पाने मत्स्यार्च्चे परिवर्तने फलमूलजलाधारी यदि शल्यं भवेदिति नारदपंचरात्रे: सुप्तः प्रबोधः परिवर्त
नमेव वर्ज्य मिति सिद्धांतः श्रावणमल्ल द्वादश्यादाधिकारंभोदाहिता प्रसिद्धः अत्रैव विशेषः पवित्रारोप
णादूर्द्ध नित्यं भाद्रपद शुक्ला द्वादश्यां श्रवणयोगे नैधा श्रवणम् विमज्य तन्मध्ये मार्गादि शेषं पूर्वोक्त
मेव अत्रापि कल्पभेदेन वामनावतारः उक्तः तेन वामन द्वादशीति प्रसिद्धा अस्य व्रतस्य त्रयोदश्यां पार
णं कृतेपि बहुफलं यत्र यदिने श्रवणायोगः एकादश्यां द्वादश्यां वासे वोपोष्यः दिनद्वये तत्संज्ञे विष्णुशृंख
लको नाम विष्णुसायुज्य कृद्वेदिति विष्णुधर्मोक्त वचने निर्णयसिंधे द्वादश्यास्ते विधिः प्रोक्तो श्रवणेन
युधिष्ठिर सर्वपापप्रशमनः सर्वसौख्यप्रदायकः नारदीयेपि संस्पृश्यैकादशी यदि संस्पृशेत् श्रवणायो
निषाश्रैवं ब्रह्महत्यां व्यपोहति उत्तराषाढसंमिश्रा श्रोणया मध्यान्दगापिवा आसुरस्यैवनारस्या हंति पु
ण्यं पुरा कृतमिति उदयव्यापिनी ग्राह्या श्रोणा द्वादशि संयुता विस्त्वस्प्टे संयुता सांचिन्नोपव्यायशुभेशुभ
रित्यादीनि विष्णुधर्मस्कांदभविष्यादि वचनानितानि निर्मूलानि यदपि स्मृत्यर्थसारे उदयव्यापिनी
ग्राह्येत्युक्त मितिनिर्णयसिंधे योग विशेषे भवन्त्यपि प्रशस्तद्वयं बुधेः निःसृप्तस्तास्तत्रक्त दिनाद्वये
उपवसेदसक्तः एकादश्यां फलाशनो द्वादश्यामुपवसेत् एकामेकादशीं त्यक्त्वा द्वादशीं समुपोषयेत्
पूर्ववासरजं पुण्यं सर्वं मान्नोत्य संशय मिति विष्णु रहस्यात् अत्र दुग्ध व्रत मकार्य्यं पायसादि वर्जनं

CC-0 Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ने. विपाठः दिनद्वये तद्व्याप्तौ पूर्वा तदुक्तम् त्रयोदशीयुतायांच चतुर्दश्यां निशाऽसिते विधूदये नरः स्नात्वा नर
४८ कं नैव पश्यतीति दिनद्वये तदव्याप्तौ व्यापिनी काले सत्वात्पूर्वैव तदुक्तं विद्धापूर्वचतुर्दश्यां कार्तिकस्य सिते
तरे पक्षे प्रत्यूषसमये स्नानं कुर्य्यात्प्रयत्नतः इति प्रत्यूषोदयमरुणमिति कोशात् पूर्वदिने प्रत्यूषसमयाऽव्या
प्तौ तु रात्रिं चतुर्दशस्य यामव्यापिनीं स्वीकृत्य परैव ग्राह्या तथा प्युक्तम् तथा कृष्णचतुर्दश्यां माश्विनोऽर्कोदयात्प
श्चायाम्यां मिन्या पश्चिमे यामे तैलाभ्यंगं विधीयते इति एतेन मुख्य काले रुणोदये चतुर्दशी मध्ये एव स्नानंक
तव्यमिति सिद्धांतः तदुक्तं मात्स्ये मृगांकोदयवेलायां त्रयोदश्यां यदा भवेत् दर्शो वा मंगलस्नानं दारवशोक्त
प्रभप्रदं अरुणोदयपुतेन्यत्र रिक्तायां स्नाति यो नरः तस्याब्धिक भवो धर्म्मो नश्यत्येव न संशयः इति भविष्या
त् चत्वारो घटिकाप्रातः अरुणोदय उच्यते अत्र स्नात्वाऽपामार्गादिभ्रामयेत् इत्युक्तम् अपामार्गमथातुंवी भ्रा
मयेच्छिरसोपरि ततश्च तर्प्पणं कार्य्यं धर्म्मराजस्य नामभिरिति ब्राह्मे व्रताऽर्केविस्तारः इति नर्कचतुर्दशी
अथ कार्तिक शुक्ल चतुर्दशी वैकुंठसंज्ञा सा द्वयविस्तु व्रतोपि पूर्वे निर्णयोक्ता प्रदोषनिशीथोभयव्यापिनी ग्रा
ह्या इदं पूर्वसामान्यनिर्णये एव अत्र हरिपूजनमुक्तं तत्र परा ग्राह्या अत्रैव पूर्वे विश्वेश्वरस्य प्रतिष्ठा त
तस्मात् तन्त्री तेनोपदेशवसादी क्रियते तदारुणोदयव्यापिनी ग्राह्या दिनद्वये तद्व्याप्तावस्या व्याप्तौ परैवेति त्रि
स्थलीसेतौ अत्रैव विश्वेश्वर पूजन प्रवर्षतः कार्य्या तत्रापरान्ह व्यापिनी दिनतद्व्याप्ताव्याप्तौ पूर्वैव अयमार्गे

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

शयने मत्स्यार्च्चे परिवर्तने फलमूलजलाशी यदि शल्यं भवेदिति नारदपञ्चरात्रे। सुप्तः प्रबोधः परिवर्त
नमेव वर्ज्यमिति सिद्धान्तः श्रावणशुक्लद्वादश्यादावितरारंभोदाहिरी प्रसिद्धः अत्रैव विशेषः पवित्रारोप
णाख्यं नित्यं भाद्रपदशुक्ला द्वादश्यां श्रवणयोगे नैधाश्रवणस्य विभज्य तन्मध्ये भागाविशेषेण पूर्वोक्त
मेव अत्रापि कल्पभेदेन वामनावतारः उक्तः तेन वामनद्वादशीति प्रसिद्धा अत्र व्रतकाले त्रयोदश्यां पार
णे कृतेपि बहुफलं यत्र यदिने श्रवणायोगः एकादश्यां द्वादश्यां वासै वैष्णव्यं दिनद्वये तत्सत्त्वे विष्णुशृंख
लको नाम विष्णुसायुज्यकृद्भवेदिति विष्णुधर्मोक्तवचने निर्णयसिंधौ द्वादश्यास्ते विधिः प्रोक्तः श्रवणेन
युधिष्ठिर सर्वपापप्रशमनः सर्वसौख्यप्रदायकः नारदीयेपि तस्मिन्नेकादशी यदि स्यात् श्रवणेन श्रवणायो
गिवासितं ब्रह्महत्या व्यपोहति उत्तराषाढसंमिश्रा श्रवणा या मध्यान्हगा यदि आसुरस्यैव तारस्या हन्ति पु
ण्यं पुराकृतमिति उदयव्यापिनी ग्राह्या श्रवणा द्वादशि संयुता विश्वर्क्षे संयुता सा चेल्लोपव्यायमुभेमुभ
रित्यादीनि विष्णुधर्मस्कांदभविष्यादिवचनानि तानि निर्मूलानि यदपि स्मृत्यर्थसारे उदयव्यापिनी
ग्राह्येत्युक्तमिति निर्णयसिंधौ योगविशेषो भवत्यस्मिन् प्रशस्तद्वयं बुधे। निम्नप्रशस्ता प्रत्यक्ता दिना द्वये
उपवसेदसक्तः एकादश्यां फलाशनो द्वादश्यामुपवासेन एकामेकादशीन्यक्त्वा द्वादशीं समुपोषयेत्
पूर्ववासरजं पुण्यं सर्वमाप्नोत्यसंशयमिति विष्णुरहस्यात् अत्र दुग्धव्रतमकार्य्यं पायसादि वर्जनं ४३

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ने. विपाठः दिनद्वये तद्व्याप्तौ पूर्वा तदुक्तम् त्रयोदशीयुतायां च चतुर्दश्यां निशाऽसिते विधूदये नरः स्नात्वा न
४८ कं नैव पश्यतीति दिनद्वये तद्व्याप्तौ व्याप्तिनी काले सत्वात्पूर्वैव तदुक्तं विद्धा पूर्वचतुर्दश्या कार्त्तिकस्य सिते
तरे पक्षे प्रत्यूष समये स्नानं कुर्यात्प्रयत्नतः इति प्रत्यूषोहस्रवमिति कोशात् पूर्वदिने प्रत्यूष समयाऽव्या
प्तौ तु रात्रि चतुर्दश्यां यामव्याप्तौ स्वीकृत्य परैव ग्राह्या तथा प्युक्तम् तथा कृष्णचतुर्दश्या माश्विनेऽर्कोदयात्प्र
थमयामिन्या पश्चिमे यामे तैलाभ्यंगं विधीयते इति एतेन मुख्य काले रुणोदये चतुर्दशी मध्ये एव स्नानंक
र्तव्यमिति सिद्धांतः तदुक्तं मात्स्ये मृगांकोदय वेलायां त्रयोदश्यां यदा भवेत् दर्शे वा मंगल स्नानं दुःखशोका
शुभप्रदं अरुणोदय युतोन्यत्र रिक्तायां स्नाति यो नरः तस्याब्धिक भवो धर्म्मो नश्यत्येव न संशयः इति भविष्या
त् चत्वारो घटिका प्रातः अरुणोदय उच्यते अत्र स्नात्वाऽपामार्गादि भ्रामयेत् इत्युक्तम् अपामार्गमथो तुंबीं प्र
मये च्छिरः शोपरि ततश्च तर्प्पणं कार्यं धर्म्मराजस्य नामभिरिति ब्राह्मे व्रताऽर्के विस्तारः इति नर्कचतुर्दशी
अथ कार्तिकशुक्ल चतुर्दशी वैकुंठ संज्ञा सा इयं विश्व व्रतोपि पूर्वे निर्णयोक्ता प्रदोष निशीथोभय व्यापिनी ग्रा
ह्या इदं पूर्वसामान्य निर्णये एवं अत्र हरिपूजन मुक्तं तत्र परा ग्राह्या अत्रैव पूर्वे विश्वेश्वरस्य प्रतिष्ठाप्ता त
तस्मात् तत्र्यौ तेनोपदेशे व सादी क्रियते तदारुणोदय व्यापिनी ग्राह्या दिनद्वये तद्व्याप्तावव्याप्तौ वा परैवेति त्रि
स्थलीसेतौ अत्रैव विश्वेश्वर पूजन प्रकरणतः कार्या तत्रापरान्ह व्यापिनी दिनद्वये तद्व्याप्तावव्याप्तौ पूर्वैव अथ मार्गे

CC-0.Courtesy Shri K.S Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

 न्हे अभिजित्संज्ञे मुहूर्ते ग्रहशोभने स्वातिनक्षत्रयोगे च शनिवारे तु मङ्गले सिद्धयोगस्य संयोगे वाणिजे करणे
 तथा पुत्रान्सौभाग्ययोगेन लभन्ते दैवयोगतः एभिर्योगैर्विनापि स्यान्मङ्गलं पापनाशनं सर्वेषामेव वर्णानामत्रा
धिकारोस्ति मङ्गलं शत्रुभ्यो निर्भयं तस्य असुराणां ते नराः मम व्रतप्रभावेन नित्यं कामं च लभ्यते इति अत्र
श्रावणशुक्लचतुर्दश्यां पूर्वविद्धा त्रिव्यापिनी ग्राह्या शिवपवित्रारोपणे शैवघाते अथ भाद्रपदशुक्लचतु
र्दश्यामनन्तव्रतं सा परा अत्र परदिने मुहूर्तमात्रसत्त्वेपि परौदकी ग्राह्या मध्यान्हे भोज्यवेलायां सदा सर्वेषु
यदा यदा मध्यान्हशब्देन मध्यान्हव्यापित्वं दिवोदासेनोक्तं तच्चिन्त्यं इतिहासपुराणरूपार्थवादी शीला
कौण्डिन्ययोरेव तयोश्च दर्शितं ननु तासां तत्समये पूजाप्रारम्भत्वमायात्यनेन वचनेन इदं औदयिकत्वपूर्वे
व अकर्मेयं निषिद्धमलमित्युक्तं निर्णयामृतेषु घटीमात्रेप्यौदयिके त्युक्तं कलायामपि चेद्वादे पौर्णिमा
यां चतुर्दशी संपूर्णा स्नानं विदुस्तस्यां पूजयेद्विष्णुमव्ययं नभस्य भाद्रपदस्यान्ते चतुर्दश्यां द्विजोत्तमः पौर्णिमा
स्याः समायोगे व्रतं चानन्तकं चरेदिति भविष्योत्तरस्कान्दोक्तेः इति सिद्धान्तः इति अनन्तव्रतं अथागस्त्य
ऽर्घ्यः सूर्ये सिंहगते सत्यैकविंशतिदिनोपरि अगस्त्योदयः उदेयाम्यां हरिसंक्रमाद्रवेः एकाधिके विंशति
मे अगस्त्यः इति दिवोदासीये अथ कार्तिककृष्णचतुर्दशी सा चन्द्रोदयव्यापिनी ग्राह्या तदुक्तम् कार्तिकस्या
सितेपक्षे चतुर्दश्यां विधूदये अवश्यमेव कर्तव्यं स्नानं नरकभीरुभिः इति मदनरत्ने क्वचिद्दिनोदयेदृश्य

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वि. शिवसर्वासामुपवासव्रतादिषु तिथ्यंते पारणं कुर्य्यात् दिवा शिवचतुर्दशीति परापरदिने यदेव पर्य्यंतं व्याप्ता
५० तदन्तु अन्तरेव पारणा कथं कार्य्या कालादर्शे यामत्रयपर्य्यंतं व्यापिनी चेत्परेहनि तच्चैव पारणं कुर्य्या
त्पारणे चैव दोषभागिति कालादर्शोदयः अत एव शिवरात्रिविषये पि तिथ्यंते पारणमुक्तं इयं नोन्या का
म्या च अत्र करणे दोषश्रवणात् करणे बहुफलाच्च शैवस्मार्त्तोभय शाक्ताद्यैश्चांडालादिभिर्भिन्नैरपि अव
श्यमेव कर्त्तव्या शिवरात्रिव्रतमुहूर्त्तमिति सर्वाधिकारिणः स्वधर्मोक्तसामग्रीभिः पूजा कार्य्या इति निर्ण
यदर्पणे चतुर्दशी प्रकरणं २५ अथ पौर्णमासी सा तु सावित्री अतिरिक्ता सर्वापरैव तदुक्तं भूतविद्धा न क
र्त्तव्या दर्शपूर्णा कदाचन वर्जयित्वा मुनिः अत्र सावित्रीव्रतमुत्तममिति ब्रह्मवैवर्त्ते ज्येष्ठी अमावा
स्या ३० भाद्री पौर्णमासी सा तु सावित्री व्रतं ज्ञेया उक्तं च विष्णुधर्मोत्तरे एकादश्यष्टमी षष्ठी पौर्णमा
सी चतुर्दशी अमावस्या तृतीया च ता उपोष्याः परान्विता इति सावित्रीव्रतवर्जं अत एवान्यत्र पूर्वविद्धो
पवासविधायकानि वाक्यानि तानि चतुर्दशीव्रतघात सावित्रीपटपैत्रकी अनंगत्रयोदशीरंभा उपोष्या
पूर्वसंयुतेति तदुक्तं प्रतिपत्यं चमीभूत सावित्रीवटय इतम् नवमी द्वादशी चैव नोपोष्या परसंयुतेति सर्वा
स्वपि पूर्णिमासु अमावस्या वृद्धाहं निनित्यं तपानापितामहः अमावस्याव्यतीपातपौर्णमास्यष्टकासु च वि
द्वन् श्राद्धम् कुर्वाणो नरकं प्रतिपद्यते अन्यच्च दर्शे च पौर्णमासीं च पितुः संवत्सरं दिनं पूर्वविद्धा मकुर्वाणो नरकं ५०

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰ ४८ शीर्षे चतुर्दश्यां पिशाचनोचनयात्रानैवमाहृतं अथमाघकृष्णचतुर्दश्यांतुयमतर्प्पणमुक्तं तत्सूर्योदयो
दयात्मागेवस्नात्वा कार्य्यं अत्रोदयव्यापिनीग्राह्या: अथ फाल्गुण कृष्णचतुर्दशी शिवरात्रि: साद्दि्धाप्रदोष
निशीथोभयव्यापिनीग्राह्या: प्रदोषयोगिनी शीथयो शिवचनानां दर्शनात् तदुक्तंस्मृत्यंतरे प्रदोषव्यापिनी
ग्राह्याशिवरात्रिचतुर्दशीरात्रौजागरणं यस्मात्तस्मात्तांसमुपोषयेत् इतिअन्यच्च आदित्यास्तमयेकालेअ
स्तियद्या चतुर्दशी तद्रात्रिःशिवरात्रिस्यात्साभवेदुत्तमोत्तमं इतिकामिकात् निशीथगाप्युक्तामाघकृष्णच
तुर्दश्यामादिदेवो महानिशी शिवलिंगात्समुद्भूत: कोटिसूर्य्यसमप्रभ: माघफाल्गुणयोर्मध्येयस्याछि
वचतुर्दशी अनंगेनसमायुक्ता कर्त्तव्यासासदातिथि इतिअनंगत्रयोदशीनिशीथव्याप्तियोगमाहनिशि
भ्रमंतिभूतानिशक्तय: शूलभृद्यत: अत तस्याचतुर्दश्यां सत्यांतत्पूजनं भवेदिति भूतानेशिपिशाचद
य: पूजाग्रहणत्रयवासजागरणयोरपिउपलक्षणार्थं नागरखंडे माघमासस्य कृष्णायांचतुर्दश्यांसुरेश्वरि
अहयास्यामिभूपृष्ठे रात्रौनैवदिवा कलौ लिंगेषुचसमस्तेषु स्थावरेषु चरेषु चरेषुच संक्रमस्यापिसंदिग्धं
वर्षपाप विशुद्ध्येतस्माद्रात्रौ हिमे पूजांय: करिष्यति मानवा: मंत्रैरेतैसुरश्रेष्ठ पापनाशंभविष्यति अत्र
माघमासस्ये निर्दर्पातमासाभिप्रायेण ज्ञातव्यम् तदुक्तं वैवर्ते सूर्योस्तेनवनाडीषुभूत विद्धात्रयोदशी
शिवरात्रि व्रतं तत्रकुर्य्याज्जागरणं निशिनिर्णयामृतेतिपारणातिथिअंत्यएव कार्य्यातदुक्तं तिथिना ४८

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

॥वि नयापै परित्यज्यते कृत्वा सांवत्सरी यात्रा जगन्नाथ महाप्रभो इति अथ श्रावणी पौर्णमासी पवि
त्रारोपणादौ पूर्वविद्धा ग्राह्या तदाह रुद्रधमः श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी पूर्वविद्धा प्रकर्त
व्या शिवरात्रिर्बलिर्दिने इति वेधस्तत्र त्रिमुहूर्तात्मको ज्ञेयः तदुक्तं स्कांदे यां तिथिं समनुप्राप्य यात्य
स्तं पद्मिनीपतिः सा तिथिस्तद्दिने प्रोक्ता त्रिदिने मुहूर्तौ वयाभवे दिति अथोपाकर्मनिर्णयः यात्तव
ल्क्यः अध्ययनामुपाकर्म श्रावण्यां श्रवणे विना हस्ते नौषधिभावे वा पंचम्यां श्रावणस्य तु इति श्रावणी
पौर्णमासी तु उदयकालव्यापिनी ग्राह्याः तस्या यजुः शाखाध्यायिनामुपाकर्म बह्वृचां तु श्रावण नक्षत्रे
धनिष्ठा युक्ते कार्यः तदुक्तं श्रवणर्क्षे तु ऋग्वेदे यजुर्वेदे धनिष्ठया हस्तर्क्षे सामवेदे तु शेषा सर्वेषु पूर्णि
मा गर्गः पर्वण्यौदयिके कुर्युः श्रावण्यां तैत्तिरीयका बह्वृचा श्रावणे कुर्युः ग्रहसंक्रांतिवर्जिते इति साम
वेदिनां तु श्रावणमासस्य हस्तर्क्षयुक्तायां पंचम्यां च पर्वण्युदयके कुर्युः चतुर्दश्यां समुत्पन्नौ असुरौ मधु
कैटभौ वेदास्तौ कुर्विते: पद्मः योनिस्तौ जग्रहः श्रुतिः हत्वा ताव सुरौ देवः पाताल तलवासिनौ आहृत्य
ताः श्रुतीस्तस्मै ददौ लोक पितामह संप्राप्ता वान श्रुती ब्रह्मा पर्वण्यौदयिके पुनः औदयिके इति श्रवणाह
स्ताभ्यामपि संबध्यते औदयिक पर्व विषये तष्ट ससीपदं हस्त श्रवणयो रुपलक्षणं तथा परिष्वि चंद्रोदये
उदये संगवस्पर्शे युक्ते पर्वणि वार्कभे कुर्युर्नभस्युपाकर्म ऋग्यजुः सामगाः क्रमात् इति धनिष्ठा प्रतिपद्युक्तं ५२

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰ प्रतिपद्यते इति शास्यात् अन्यदपि सूर्योदया चोदयसंगताया काश्चित् तिथ्यः खलु ताश्च पूर्णा कार्या मनुष्यै
५१ श्रुतिधर्मो निर्दिष्टः दामोदरस्यैव दिनं विहायेति तिथिनिर्णये चैत्रपौर्णिमायां विशेषवायुपुराणे सांवत्सर क
ताचार्य्यैः साफल्याय खिलान् सुरान् दमनेनार्चने चैव विशेषेण सदा प्रभो भैरवस्य रवौ या मावस्या तदंते
चांद्रया पूर्णिमासी सा चैत्री एतत्क्रमेणान्यादपि नक्षत्रं हारिदत्तेन भैरवादिस्ये सवितरि यो दर्शप्रवर्तिते चांद्र
मासास्तदंताच चैत्राद्या द्वादशमासस्मृताः तेषु पौर्णमासी साचैत्र्यादिस्वनाकदाचित् केन योगेन नक्षत्रस्ये
ति निर्णयः अथ वैशाख पौर्णमास्यां विशेषकजावलिः अणुनामुदकुंभं चैव शास्त्यां च विशेषतः निर्दि
श्यधर्मदेवाय गोदानफलमाप्नुयात् धनमल्लसुखे कुंभं सवस्त्रं दक्षिणां देहं अथ ज्येष्ठः सावित्राव्रतं भ
विष्ये ज्येष्ठे मासि ऽसितेपक्षे सावित्रीव्रतमुत्तमं चीर्णापूर्व महाभागा कथयेन मया न्रपेति इयं पूर्वविद्धा
ग्राह्याः युग्मवचनात् ब्रह्मवैवर्ते प्रतिपत्पंचमी भूत १४ सावित्री व्रत पूर्णिमा नवमी द्वादशीचैव नो
पोष्मा परसंयुताः इति अथाषाढी पूर्णिमासि तु कोकिलाव्रतचक्रमेसंध्याकालव्यापिनी ग्राह्याः आषाढ पूर्ण
मास्यां तु संध्याकाले ह्यवस्थिते संकल्पयेन्मासमेकं श्रावणेऽप्यहं त्विदमिति भविष्ये सैव व्यास पूजायां तु औद
यिकमात्र मुहूर्तमात्रमपि ग्राह्या तथा च विश्वेश्वर पद्धतौ त्रिमुहूर्ताधिकं ग्राह्यं पर्वद्वौर प्रमाणयोः इति श्रैवा
पूर्वाषाढे श्रीगुरे पूजा यत्ना चोत्का काशीखंडे उदीच्याभार भूतेषमाषाढी शसमर्चयेत् आषाढ्यां पंचद ५१

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वि. पि घनिष्ठा प्रतिपद्युक्तं त्वाष्ट्र ऋक्षसमन्वितं श्रावणं कर्म कुर्वीत ऋग्यजुः सामगाः क्रमात् इति निर्णयामृ

५८ ते उपकर्म तु कुर्वन्ति क्रमात्साम यजुः विदा ग्रहसंक्रांति युक्तेषु हस्तश्रवण पर्व सुनत्र स्मृति श्रावणीय दि

पूर्णा स्याद्देवर्षे पितृतर्पणं तदा करोति भद्रायां श्रमेरुजा निरदीका इति वचना दुपाकर्म्मादिकं भद्रायां मे

व कुर्य्यात् रक्षिणापि विधान भद्रांते रात्रौ कर्तव्य मित्यर्थः पौर्णमास्यास्तृतीयाय प्रहरस्यान्य घटेत्रयं भ

द्राकृतं इति मुहूर्तगणपते नोक्तं चतुर्दश्यां भूपनाशः प्रतिपद्धते प्रजाः पूर्णमास्यां प्रकुर्वीत भद्रा पुच्छ समा

गमे इति नारदीय संहितायां देवज्ञभूषणे अन्यच्च श्रावणी होलिका पूजा भद्रा पुच्छे शुभप्रदा चतुर्द

श्यां शनि पादेन होलिका पूजया क्वचित् इत्यपि भूषणे भद्रापुच्छं तु ज्योतिः शास्त्रे प्रसिद्धमिति अथ

संक्रांति ग्रहणयोर्विशेषः यदि स्यात् श्रावणि पर्व ग्रहण संक्रमदूषितं स्यादुपाकर्णं अमलः पंचम्यां श्रा

वणस्य तु स्मृति महार्णव युक्तं संक्रांति ग्रहणं वापि पौर्णमासेन भुत्वात् नतिथ्यंतर नक्षत्रांतरगतये

र्पितेन चतुर्दश्यां प्रतिपदुत्तराषाढ घनिष्ठादौ ग्रहणे संक्रांतौ वा पर्वणि चोपाकर्म यदा भवेत् उपाक

तिस्तु पंचम्यां कार्य्या वाजसनेयिभिरिति वाजसनेयिभिरिति वाजसनेयपदं बह्वृचोनाम प्युपल

क्षणं पंचमीं तद्दृष्टं विनिंहां सर्वान् ग्रहण संक्रांति निषेधोऽत्र द्रव्य रीत्याह प्रयोग पारिजाते बह्व

मग्नेयः हातानाक्रतं दंतं स्यान्वानामेव वा नोपा कर्म तदा कुर्य्या च्छावणश्रवणे पि वेनियमोपिश्रावणे ५८

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰ त्वाषाढ्युक्तसमन्वितं श्रावणं कर्म कुर्वीत ऋग्यजुःसामपाठकाः तत्र कर्मविशेषः उपाकर्मणि चोत्सर्गे यथा
५२ कार्य्यं समेत्य तु ऋषिन्दर्भमयान्कृत्वा पूजयेच्च ये ततः इति व्यासकृ ऋषीणामर्चनं सर्वं कर्तव्यं च निधीनि
नेति कार्ष्णाजिनिः वेदारम्भणात् पूर्वं वक्तुम्प्राशन नन्तरं नवयज्ञोपवीतानि दद्याद्धारयेत्तत इति गालवः कृ
त्वा यज्ञोपवीतानि नवानि वसुधाधिपः इनाग्रे गुरवे दत्वा पितृभ्यो धारणं ततः पितृभ्य इत्यपि हत्वेत्यनुष
ज्यते वायवीये उपाकर्मणि विप्रेभ्यो दद्याद्यज्ञोपवीतकम् आयुष्मान् जायते तेन कर्मणा मानवो भुवि:
ब्रह्मचारिणो विशेषः मालादर्शे मौञ्जी यज्ञोपवीतं च नवं दण्डं च धारयेत् अजिनं कटिसूत्रं च नववस्त्रं तथैव
च अत्र विशेषः पश्चादग्नेस्तदर्भेषु पवेरयन्व आशिन्व्यापः पाणिवदौ दर्भास्तत्र निधाय च प्राग्दर्भगर्भेस्ते
कृष्य ब्रह्मांजली नता सव्या इति जपंतु वै सावित्रीं ब्रह्मयज्ञवत् अथ भद्रायां विशेषमुक्तं उपाकर्मतु सं
ति संभवे भद्रांते असति संभवे भद्रायामेव अन्येपि भद्रायां द्वेन कर्तव्ये श्रावणी फाल्गुनी तथा श्रावणी
नृपतिं हन्ति ग्रामं दहति फाल्गुनीति श्रावण्यां क्रियमाणं रक्षाबंधनं कर्मः अन्यथा न कुर्य्यात् अत्र यज्ञो
पवीतधारणं ऋषितर्पणादिकर्म भद्रायामेव कुर्यात् रक्षाबंधनं कर्म ततो न स्मृतिः नैष्यकालान्तरा
विधानात् आलोपि श्रवणोनन्तु यत्कर्म उत्तराषाढसंयुतं संवत्सरकृतोध्याय स्तत्क्षणादेव नश्यति इति
धनिष्ठासंयुतं कुर्य्यात् श्रवणाकर्म यद्भवेत् तत्कर्म सफलं विंद्यात् उपाकरणसंज्ञितं गीतमिति परिशिष्टे ५२ १

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰ निर्णयामृते इत्युपाकर्म निर्णयः अथ सूतक विवेकः अत्र नदीनां रजोदोषो नेत्याह गर्गः उपाकर्मणि चोत्सर्गे
५९ रजोदोषो न विद्यते अन्यापि दीपावल्यां च फाल्गुण्यां अथ श्यामप्रावणी वत्सपूजा वट श्रवण मान सूतके
तथा इति श्रावणी पूर्णिमा निर्णयः अथ भाद्री पूर्णिमा भाद्रपदी पूर्णिमास्यां सावित्री व्रतं सुवासिनी नारी भर्तु
राणु वृद्धये सावित्री व्रतं कुर्यात् उक्तं च भविष्योत्तरे भूयतां पांडव श्रेष्ठ सावित्री व्रतमाचरेत् ज्येष्ठे रूपं भाद्रपदे
दंतधावन पूर्वकं त्रिरात्रि नियमं कुर्यादुपवासोस्यभा अमावास्या भिन्न पौर्णमास्यां आवर्तनान्यात् सधीमिति
प्रवृत्ति शर्दं व्रतं कार्यं चंद्रपर्यंतं सा महाफलं वैसवंत अविपर्येपि प्रारब्धे मदनसुरपूजामंत्रजपादिभिः संपू
जितव्यः पूर्णेन्दुः पयसा पयसेन च इत्युदयकी ग्राह्या: अथ कार्त्तिकपौर्णिमायां कार्त्तिके पूर्णमास्यां च कार्त्तिकेय
दर्शनमुक्तं सा चोदयिकी ग्राह्या: कार्त्तिक्यां कृत्तिकायोगे यः कुर्यात्स्वामिदर्शनं सप्तजन्म भवेद्विप्रो धनाढ्यो वेद
पारगः इति कार्त्तिक्यां श्रीपुत्रस्यां च दीपं श्रीकृष्ण संयुतं यो ददाति नरः अथ तस्यां नालं चतुर्दश: पौर्णमास्यां
तु संध्यायां कर्तव्यं विष्णु सन्निधौ दद्यादनेन मंत्रेण सुदीपिस्त्व सुरालये कीटाः पतंगा मशकाश्च वृक्षा जलस्य
ले ये विवसंति जीवाः दृष्ट्वा प्रदीपं न हि जन्म भागिनो भवंति सत्यं श्वपचा अपि विप्राः इति अथ फाल्गुणपौर्ण
मास्यां होलिकोत्सवः नृपप्रतिनारद वचो भविष्ये अथ पंचदश्यां शुक्ला फाल्गुणस्य नराधिपः आ म यश्चैव
लोकानां दीपना परमेश्वरः यथा शंकिता लोका रमंति विहसंति च दारुजानि च खंडानि गृहीत्वा हुस ५९

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि· इयस्ता चेत्संक्रांति ग्रहणं तदा उपाकर्म न कुर्वीत परतश्चेन्न दोष इति यदा पूर्णिमायां अर्द्धरात्रात्पूर्वं ग्रहणं
५५ श्रावणशुक्ल पंचम्यां संक्रांतिस्तदा भाद्रशुक्ल तृतीयायां हस्तयुक्त उपाकर्म कुर्य्यात् तदुक्तं च पूर्णोपाय
दा ग्रहण संक्रांति पंचमी शुक्ल तृतीया हस्त संयुक्ता उपाकर्म विधीयते तिसार्गपद्धतौ अत्र विशेषः पाराशरः उपा
कर्म तथोत्सर्ग सवाहोत्सव वाष्टका मासवृद्धौ परे कार्य्या वर्ज्ये पित्र्य तु पैतृकमिति परे उत्तरके पितान् पाधि
मासे तत्र्यमलमासादिषु द्विजाश्च उपमोप कृतिर्नस्यात्कृतं कर्म विनाश कृदिति पत्तु कश्यपः गुरुसंक्रांति
ऐघाने वर्जये च्छ्रुति चोदितं इत्याह भगवान् विश्वरूपं तु विशेषत तदपि ग्रहण उपाकर्म परे अत्राधिमासादौ
योगा कर्म निषेधः असंवायस्ति सामगानां कालविशेष माह गार्ग्यः सिंहे रवौ तु पुष्ये वै उपाकर्म पराह्णिकमिति
सिंहे रवौ तत्सुपाकर्म एतापि संबध्यते यजुस्मृत्यंतरे वेदोपाकरणे प्राप्ते कुलीरे संस्थिते रवौ उपाकर्म न कर्त
व्यं सिंहयुक्त कदाचनेति अयं देशविभागे विशेषः तच्छंदोगपरं तदपि वृहस्पतिः नर्मदोत्तर भागेन कर्त्तव्यं
सिंहयुक्तके कर्कटे संस्थिते भानु उपाकर्मा मदत्तरेण इति तदपि नान्प्राप्ते वदेशे विशेषेण सिंहे कर्त्तव्य वस्याप
रम एवं हिलाघव भवंति यत्र सिंहे कार्य्ये मित्यत्र तन्नर्मदोमर भाग इति एवं चतान् पत्येवद दक्षिण भागे कदा
कार्य्य मित्याकांक्षिते कर्कटे इत्याकांक्षित विधि भवति तत्र गोभिला छंदोगा मिलिताः कर्कुः प्रातरुत्सर्ग
कौकिषा अपराह्णे सुपाकर्म प्रष्पहस्तारुत्येयोर्द्विजः अपराह्णे तदाराहिते सानेरत्ता वंधन विधिं कुर्य्यादिति ५५

नि. भाग्यदायकं प्रदोषात् मध्यरात्रांतं होलिकापूजनं शुभं इति च केचिद् लेखितं तदा स्नानाकारं यदा पूर्व

५८ रात्रौ प्रदोषव्याप्त्यभावस्तत्सत्वेपि वा भद्रारहितः कालो न प्राप्यते उत्तर दिने प्रदोषे पूर्णिमाभावः तदा

भद्रापुच्छे कार्यं तथा च लल्लः पृथिव्यां यानि कार्याणि शुभानि च शुभानि तु तानि सर्वाणि सि

द्ध्यंति विष्टिपुच्छे न संशयः भद्रापुच्छं तु ज्योतिःशास्त्रे प्रसिद्धं पौर्णमास्यां तृतीयाप्रहरस्यांत्य घटीत्रयं भद्रा

पुच्छं उक्तं च मुहूर्तगणपतौ चतुर्थ्यां चाष्टमे यामे प्रथमे चाष्टमी दिने एकादश्यां तथा षष्ठे पौर्णमास्यां

तृतीयके ग्राने घटीत्रयं पुच्छं पंचेत्क्रमादयमिति अस्मिन्नेव विषये उत्तर दिने पूर्णिमा सार्द्ध यामत्र

यमिता ततोधिका वा प्रतिपद् वर्द्धमाना तु यदा सा होलिकास्यात्तेति भविष्योक्तः पाश्चात्तरदिने प्रदोषैकदेशे

स्ति पूर्वरात्रौ च भद्रारहितो नैव लभ्यते सा सामुत्तरामुत्तरैव यदा पूर्वरात्रिभद्राव्याप्ता उत्तर दिने प्रदोषे चंद्रग्रहण

तदा तत्र स्नात्वा कार्या होलिका उक्तं च कृत्वा कर्माणि कुर्वीत [illegible] विवर्जयेदिति वचनात् के

चित्तु अस्यां अधिकमासे फाल्गुने मलमासश्च शुद्धे मासि होलिका कार्या स्पष्टमास विशेषाख्यविहि

तं वर्जयेन्मल इति वचनात् होलिका पूजायंत्रस्तु अष्टरूपा भयत्रस्तैः कृत्वास्त्वं होलि बालिशैः अतः

त्वां पूजयिष्यामि भूते भूतप्रदा भवेत् इति निर्णय दर्पणे पूर्णिमानिर्णयसमाप्तः १५ अथ अमावास्यानि

र्णयः सा परविद्धाग्राह्या [illegible] इति पक्षद्वय अमावास्येति युग्म वचनात् इति प्रतिपन्नकरो उक्तं अमावास्या तत्र याचना ५८

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि. ५७

उत्सका पौधाद्भव विनिर्यांतु शिशिवः संप्रहर्षितः संवृतं मुष्क काष्ठानां संचयानां च कारयेत् तत्राग्निं विधिवत् हु
त्वा रक्षोघ्नैर्मंत्रविस्तरैः ततः किलकिलाशब्दैः तालशब्दैर्मनोहरैः तेन शब्देन सा पापा होमेन भस्मं च सा कृता
सोकोढा रक्ष्या रात्रसी च दह्यते दुःखदायिनी सर्वदुष्टापहो होमः सर्वरोगोपशांतिदः क्रियतेस्यां द्विजैः शर्थिते न
साहोलिरस्मृता तस्मग्निं त्रिपरिक्रम्य गायंति च हसंति च जल्पंतः स्वेच्छया लोकाः निःशंका यस्य जन्मनः त
त्र पूर्णिमा प्रदोषव्यापिनी ग्राह्या तदुक्तं सायान्हे होलिका कार्य्या पूर्वान्हे क्रीडनं गवामिति सायान्हेत्र प्र
दोषः तथा च तत्रैव तपस्य पूर्णिमायां तु रजन्यां होलिकोत्सव इति चंद्रप्रकाशे नारदः प्रतिपद्भूतभद्रासु
यार्चिता होलिका दिवा संवत्सरं च तद्राष्ट्रं पुरं दहति साद्भुतं तत्र भद्रायां विशेषमुक्तं प्रदोषव्यापिनी ग्राह्या पौ
र्णिमा फाल्गुनी तथा तस्यां भद्रामुखं त्यक्त्वा पूज्या होली निशामुखेषु पूज्येत होलिका सर्वतो मुखे इति प्र
थीं चंद्रोदये दुर्वासो वाक्याद्दिनद्वये तद्व्याप्तौ परैव कार्य्या दिनद्वये पि तद्व्याप्तौ तदा पूर्वेद्युः संध्यायां नि
शामुखे भद्रायां स्थितं तस्मात्पूर्वेव भद्रायां दीपितां होलीं राष्ट्रभंगं करोति वै नीरस्य च नैवेद्य तस्मात्तां परिवर्ज
येत् इति पूर्वदिने भद्रायुक्ता व्येन पुराणसमुच्चयोक्त निषेधात् पूर्वदिने प्रदोषव्यापिनी तत्परादिने चेत्तदा पूर्वे
द्युरेव रात्रौ भद्रां विहाय कार्य्या दिनार्द्धात्परतो या स्यात्फाल्गुनी पूर्णिमा यदि रात्रौ भद्रायां विहितं कार्य्यं होलि
कायाः पूजनमिति विशेषः यत्र मध्यरात्रिमतिक्रम्य विष्टिः पुच्छं यदा भवेत् प्रदोषज्वालयेद्वन्हिं सुखसौ ५७

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰
६०

घुरेवे भये पुर्वान्पात्वे उत्तरैव भविष्ये कृत्वात् पार्वण श्राद्धं इत्युक्तं ततोपरान्हः सम्मयइत्यादिना दीपदानादेक
तत्वा दर्शश्राद्धे तदमेव तत्कर्तव्य मिति नन्वमितव्यं नह्य नयोक्त मो विधीयते किल खंडमाय्या एव प्रायो व्यवह
र्यत्वेन प्राप्त त्वादत् घते उभय दिने तत् व्याप्त्याभावे पूर्वैव गौण काले सत्वात् अथार्द्धोदयः अव र्णार्के व्यतीप
त पुत्तामा पौष माघयोः अर्द्धोदयः सविज्ञेयः कोटि सूर्य्य ग्रहैःसमा इति दिवायोग प्रसस्तापंचरात्रं नैव क
दाचन स्कांदे अर्द्धोदये तुसंप्राप्ते सर्वं गंगा समं जलं शुद्धात्मानो द्विजासर्वे भवेयु ब्रह्मसंह्मितायत्किंचित्
दीयते दानं तत्क्षनं मेरु संमितं इति तत्रैव चतुषष्टि पलं मुख्यम मंत्रे तत्रकार्येत् चत्वारिंशत्पलं ४० वा
पपंच विंशति मेववा निधायपासं तत्र पद्म मष्टदलं लिखेत् पद्मस्य कर्णिकायां तु कर्षस्य मात्रं सुवर्णकं
तदभावे तदर्द्धं वातदर्द्धं वापि कारयेत् कृत्वानंदुलैः शुद्धैः पद्म मष्ट दले स्मृतं इमंमंत्र स्थापयेत् तत्र ब्रह्म
विष्णु शिवात्मकं नेषांपीति करार्थी यथ्येन माल्यैः सुशोभनैः वस्त्रादि भिरलं कृत्य ब्राह्मणाय निवेद
येत् मंत्रश्च सुवर्णपायण भन्वं यस्मादेत त्रयीमयं आवयोस्तारकं यस्मात्तस्मात्तद्धहाण द्विजोत्तमेति
समुद्र मेखलां पृथ्वीं सम्यक् दत्वाच यत्फलं तत्फलं लभतेमर्त्यः कृत्वादान ममंत्रक इति अमंत्रपात्रं
अथफाल्गुणी अमावास्यायां रुद्रादिपूजाल्लेगो फाल्गुण कामे अमावास्यांच पूज्याश्च रुद्रो गिन् द्वौ
सुस्तया माषोदनैःपालि काभि काभिः पूज्य श्चात्म सवांधव इति अथवार विशेषः सोमदिवसे ।

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि· उपोष्या परान्विता: इति स्मृतेः भूतविद्धा २५ अमावास्या३ नग्राह्या मुनिपुंगवै रिति स्कांदे पूर्वविद्धानिषेधाच्च न
५६ ग्राह्या मुनिपुंगवैः षष्ठ्याष्टमीतिदर्शः कृष्णपक्षे त्रयोदशी एताः परयुता पूज्याः पराः पूर्वेण संयुता इति ब्रह्मपुराणे पूर्वविद्ध
निषेधात् तथा च देवलः नागविद्धा तु या षष्ठी सप्तम्या तु तथाष्टमी दशम्यैकादशी विद्धा त्रयोदश्यां च चतुर्दशी भूत
विद्धाप्यमावास्या न ग्राह्या मुनिपुंगवैः उत्तरोत्तरविद्धास्ताः कर्तव्याः कालनिर्णये इति सावित्रीव्रते तु पूर्वविद्धा ग्रा
ह्याः तदुक्तं स्कांदे भूतविद्धा सिनीवाली न तु चंद्रः कुहूः स्मृतेः इति व्यासोक्तेः अथ गृह्यपरिशिष्टः एकादश्यष्टमी
षष्ठी उभौ पक्षे चतुर्दशी अमावास्या तृतीया च ताः उपोष्याः परान्विताः एतत्सामान्यनिर्णयः अथ विशेषः
ज्येष्ठी अमावास्यायां वटसावित्री व्रतं तदुक्तं भविष्ये युधिष्ठिरं प्रति स्त्री कृष्णवा कं विशेषतस्त्वमाव
स्यां ज्येष्ठस्य नित्यं शर्वर्यैः गृहीत्वा वालुकां चाग्रे प्रस्थमात्रं युधिष्ठिरः सा तु विद्धा पूर्वा ग्राह्या: पूर्वोक्तसामान्य
निर्णयः अथ भाद्रपदमावास्यां कुशग्रहणमाह हारीतः मासे नभस्य मावास्यात् तस्यां दर्भोच्चयो मतः अयातयामा
स्ते दर्भा विनियोज्याः पुनः पुनरिति आश्विने पितृसंबंधि मध्याह्नव्यापिनी ग्राह्या अथ कार्तिकमावास्यां कृत्य
मुक्तं आदित्यपुराणे दिवा तत्र न भोक्तव्यं ऋते बालातुरान् जनान् प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमं दीप
वृक्षास्तदा कार्या मंदिरे सर्वगोगृहे विश्रामालये विप्रेषणाः संपूज्या भगवान्प्रियाः नालिबंधा पितुल्ला सस्यते सहकांशो प्र
दोषे देवदर्शने उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनं इति अत्र प्रदोषस्य कर्मकालत्वात् पूर्वे घुरेव तत्र व्याप्तो पूर्वैव उत्तरे ५६

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ने. संकाल कुतुपो नाम पितृ नादत्तमक्षयं मुहूर्त्तेन यात्मकं कुतुपो नामः अत्र कुहू इष्ट चंद्रासिनी वालीनष्टचं
२ द्रकुहूमता दिन ह्येपि संस्पर्शे कालजा वालि संमतं अपरान्ह ह्या व्यापीयदी दर्शांतिथि द्वये आहिताग्नि:
सिनी वाली एन्यादे कुहूमता आदि शब्दात् स्त्रीशूद्रयो रपिग्रहणं शिनीवाली
हिजे कार्य्या सग्निके: पितृकर्मणि स्त्रीशूद्रश्च कुहूत्येयानत्याचान ग्नि
कोहिजे रितिदर्श सूर्य्येंदु संगमः सूर्य्यं वंशोद्भवो रामः चंद्रः श्रीकृष्ण
उद्भवः तयो योगे महत्पुण्यं सा तिथि देवपित्रयोः तस्मादानं मह
त्पुण्यं स्नानं सर्वं सुखावहं गंगायोगे स्नानं यमुना
तीर्थे संगमेति स्मृत्यंतरे॥ इतितिथि निर्णय
दर्पणे अमानिर्णय समाप्तम्॥ शुभमस्तु॥
शहर मेरठ मानूबस्ते अनवरी वहतमा
म मीररवीं केसे छपा बफ़रमायश
लाला नथमलसेठ बक़लम्
पंडितहरदेव संवत् १९३७

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नि॰ अमासोमयोगे कपिलधारतीर्थे श्राद्धमुक्तं काशीखण्डे अमासोमदिने सभायोगे श्राद्धं यद्यत्र ल
६९ भ्यते तीर्थे कपिलधारेऽस्मिन् गंगायां पुष्करेण किं दिव्यान्तरिक्षभूतानि । तीर्थानि सर्वशः नान्यत्र नि
वसिष्यन्ति दर्शसोमदिनान्विते अथ चतुःपर्व विशेषः अमावास्यां तु सोमेन सप्तमी भानुना तथा चतु
र्थी भूमिपुत्रेण सोमपुत्रेण चाष्टमी चतस्रस्तिथयस्त्वेता सूर्यग्रहणसंभवाः स्नानं दानं तथा श्राद्धं
सर्वं तत्राक्षयं भवेत् इति तत्रैव श्रवणाऽर्कयोगे व्यतीपातः श्रवणाश्विधनिष्ठार्द्रा नागदैवतमस्तके
अमा चेद्रविवारेण व्यतीपातः स उच्यते तत्र जप्तं हुतं दत्तं सर्वं कोटिगुणं भवेत् नागदैवसमंपुले
षामस्तके शीर्षे मृगके अथ पद्मक योगः अमासोमेन भौमेन रविणा गुरुणा तथा सयोगपद्म
को नाम कोटिसूर्यग्रहाधिकः अथ श्राद्धाऽमावास्या निर्णयः पिंडान्वाहार्यकं श्राद्धं क्षीणरा
जनि शस्यते वासरस्य तृतीयेंऽशे नातिसंध्यासमीपतः इति अन्यच्च सायाह्नस्त्रिमुहूर्तः स्यात् श्राद्धं
तत्र न कारयेत् राक्षसी नाम सा प्रोक्ता गर्हिता सर्वकर्मसु इति यमेन सायाह्नस्य श्राद्धकालस्य प्रति
षेधे अर्थादेकादश द्वादशमुहूर्तयोः तत्कालत्वं सिद्धं इति हेमाद्रि सिद्धांत उक्तं त्रिधाशित दिनस्यांते
परान्हे च रौहिणे कथंचिदष्टम मुहूर्ते कुतुपयोगास्मः कर्तव्ये प्रथमे भागे एकोद्दिष्टमुखं क्रमात् आ
वर्तन समीपे वा तत्रैव नियतात्म वा नीति यजुर्नारदेन मध्याह्ने त्रिमुहूर्ते तु यदा चलति भास्करः ६९

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri